॥ श्रीः ॥

समीक्षाचक्रवर्ति - महामहोपदेशक - विद्या-
वाचस्पति स्व० पं० श्रीमधुसूदन ओझाजी
विरचिता ।

# ★ प्रत्यन्तप्रस्थानमीमांसा ★

सेऽयं—

ग्रन्थकर्तृ पौत्रेण श्री पद्मलोचनशर्म्मणा
सम्पादिता प्रकाशिता च ।

द्वितीयावृत्तिः ]     वि० सं० २००६     [ मूल्यम् ।।।)



समीक्षा चक्रवर्ति स्व० पं० श्री मधुसूदन शर्म्म मैथिलाः।

॥ श्रीः ॥

# * भूमिका *

यह 'प्रत्यन्त प्रस्थानमीमांसा' कई वर्ष पूर्व संस्कृत-रत्नाकर मासिक पत्र में प्रकाशित हुई थी। अब इसकी यह द्वितीयावृत्ति है।

एक देश से दूसरे देश में समुद्र पार कर जैसे भारतवर्ष से पाश्चात्य देश ( यूरोप ) में जाना प्रायः सनातन धर्मावलम्बी निषेध मानते हैं परन्तु यह शास्त्रविहित है या नहीं, इसी विषय को इसमें लिखा गया है कि किस प्रकार की विलायत यात्रा शास्त्रविरुद्ध नहीं है।

यहाँ जयपुर में संस्कृत के लिये कोई प्रेस अभी तक सुचारूरूप से कार्य करनेवाला नहीं है इसलिये कई बार प्रूफ देख लेने पर भी अशुद्धियाँ रह ही जाती हैं और फिर हमें 'शुद्धिपत्र' भी लगाना ही पड़ता है इस पर भी यदि कोई त्रुटि रह गई हों तो उसे विद्वज्जन ठीक कर लेने की कृपा करें।

जयपुर। संपादक।

ता० २६-३-५२ ई०

॥ श्रीः ॥

# ॥ प्रत्यन्तप्रस्थानमीमांसा ॥

आत्मा भूमिर्भुवनं पवनः पवमानपावकौ गगनम् ।
रविरिति यस्य हि तनवो दुरितादवतादनारतं स शिवः ॥१॥

प्रत्यन्तदेशं व्रजतामार्य्याणां धर्म्मरक्षिणाम् ।
इयं प्रस्थानमीमांसा धर्म्माधर्म्मौ विवेचयेत् ॥ २ ॥

अथेह कश्चित् त्रैवर्णिकधर्म्मपक्षपातो क्षत्रियवीरः सूर्य्यवंशावतंसो महाराजाधिराजः प्रत्यन्तदेशस्थप्रभुवरसम्राड्विशेषराज्याभिषेकमहोत्सवोपलक्षे सत्कृत्याभिनिमन्त्रितोऽनुल्लङ्घनीयबलवद्राजनिदेशमनुरुध्य नव्यतरमेकमर्णवपोतं बहुमूल्यदानेन स्वायत्तीकृत्य वेदमन्त्राभिमन्त्रिताभिरद्भिरभिनिर्णिक्तं सकुशश्रीगङ्गाजलप्रोक्षितं वास्तुप्रतिष्ठया च प्रतिष्ठिताभिर्देवताभिरधिष्ठितंतमारुह्य परः शतपरिचरपरिवारशूरसामन्तसहितो विद्वद्भिर्ब्राह्मणैश्च विभूषितः समुद्रमार्गेण म्लेच्छदेशमगच्छत् । तत्र च सहगच्छतां सर्वेषामेव योगक्षेमाय संभावितोपयोगामर्थसामग्रीमेकान्ततः स्वदेशसंभूतामेव सहोपनिनाय । श्रीगङ्गाजलप्रधानेनैवाभ्यवहरणादिव्यवहारेण च तत्र समयमतिवाहयामास । तदित्थं संभृत्यसंभारो विदुषां

ब्राह्मणानामुपदेशानुसारेण त्रैवर्णिकधर्म्मरक्षानुकूलविशिष्टप्रबन्धमाहात्म्यातिशयादंशतोऽपिसमुचिताहारविहारादिसम्बन्धेन नित्यनैमित्तिकधर्म्मानुष्ठानादिसंबन्धेन वा धर्म्महानिमजनयन्नेव तत्र प्रत्यन्तदेशे द्वित्रमासानुषित्वा स्वाचारविचारमनुवर्तमानः पुनरेव स्वदेशमार्यावर्तं कृतकृत्यः प्रत्यावर्तत।

सर्वैरपि चार्यधर्ममनुवर्तमानैर्महाराजाधिराजैरन्यैश्च त्रैवर्णिकप्रवरैः सादरं साभिनन्दनश्च सम्मानितः।

———

तद्यदेवमेवान्योऽपि कश्चित् त्रैवर्णिकः प्रत्यन्तदेशं गत्वा प्रतिनिवर्तेत्त—तर्हि तस्य तथा प्रवर्तमानस्य कश्चित् प्रत्यवायगन्धः शास्त्रमर्य्यादया प्राप्नोति न वेत्युपतिष्ठते जिज्ञासा।

———

तत्र तावदेके प्रत्यवतिष्ठन्ते। समुद्रयानेन प्रत्यन्तदेशं गतवतस्त्रैवर्णिकस्यावश्यं त्रेधा महापातकसम्बन्धः सम्भाव्यते—समुद्रयात्रानिबन्धनः; प्रत्यन्तदेशगमननिबन्धनः, पतितसंसर्गनिबन्धनश्च। तथा हि पराशरमाधवीय—निर्णयसिन्ध्वादिदाक्षिणात्यधर्म्मनिबन्धोल्लिखिते बृहन्नारदीये—

१— समुद्रयात्रास्वीकारः, कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपयमस्तथा॥

इत्याद्युपक्रम्य—

इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः ।

इत्युपसंहृतम् ।

हेमाद्याद्युल्लिखिते चादित्यपुराणे—

२—विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम् ।
द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ॥

इत्याद्युक्त्वा—

एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्वकं बुधैः ॥

इत्यभिहितम् ।

संस्कारकौस्तुभे च—

३—"द्विजस्याब्धौ तु नौयातुः शोधितस्याप्यसंग्रहः—इति वचनात्प्रत्यन्तदेशगमननिमित्तपुनःसंस्कारे कृतेऽप्यब्धौ नौयातुः संसर्गः कलौ निषिध्यते" इत्येवं कृतप्रायश्चित्तस्याप्यसंव्यवहार्य्यत्वमाख्यायते ।

भगवान् मनुरप्याह—

४—अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥

एतान् विगर्हिताचारानपांक्तेयान् द्विजाधमान् ।
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥ इति ॥

एवमुशनःशङ्खवशिष्ठमरीच्यादयोऽपि—

५—श्रुतिविक्रयिणो ये च परपूर्वाः समुद्रगाः ।
असमानान् याजयन्ति पतितास्ते प्रकीर्तिताः ॥
समुद्रयायी कृतहा रथ्यासमयभेदकः ।
वेदनिन्दारतश्चैव देवनिन्दारतस्तथा ॥
द्विजनिन्दारतश्चैव ते वर्ज्याः श्राद्धकर्म्मसु ।
इत्येवमाचक्षाणाः समुद्रयानस्य पातित्यप्रयोजकत्व-
मभिप्रयन्ति ॥

पराशरोऽप्याह—

६—समुद्रयानगमनं ब्राह्मणस्य न शस्यते ।
संभवेद् यदि मोहेन पुनः संस्कारमर्हति १ इति ॥

तथा पराशरमाधवीये स्मृतिमुक्ताफले च बौधायनवाक्यम्—

७—अथ पतनीयानि-समुद्रसंयानं ब्रह्मस्वन्यासापहरणं भू-
म्यनृतवदनम् सर्वपण्यैर्व्यवहरणं शूद्रसेवनं यश्च शूद्रा-
यामभिजायते तदपत्यश्च भवति । तेषाञ्च निर्देशः ।
एषामन्यतमं कृत्वा—

चतुर्थकालं मितभोजिनः स्युरपोऽभ्युपेयुः सवनानुकल्पम् ।
स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपहन्ति पापम् इति ॥

तदित्थं तत्तन्निबन्धोल्लिखितैरेभिर्वचनजातैः समुद्रयानस्य तावत् प्रत्यवायप्रयोजकत्वं स्पष्टमुपलभ्यते ॥ १ ॥

---

एवमेव प्रत्यन्तदेशगमनस्यापि स्वातन्त्र्येण प्रत्यवाय प्रयोजकत्वं समर्थ्यते । तथा च बौधायनसूत्रम्—

अथोपनीतस्य व्रतानि भवन्ति । नान्यस्योच्छिष्टं भुञ्जीतान्यत्र पितृज्येष्ठाभ्याम् । न स्त्रिया सह भुञ्जीत । मधुमांसश्राद्धसूतकान्नानि दशाहसन्धिनीक्षीरं छत्राकनिर्य्यासौ गणान्नं गणिकान्नमित्येतेषु पुनः संस्कारः । प्रतिषिद्धदेशगमनमित्येकेषामिति ॥

निर्णयसिन्धौ श्राद्धवर्ज्यदेशप्रकरणे वायुपुराणवचनम्—

प्रणष्टाश्रमधर्माश्च वर्ज्या देशाः प्रयत्नतः ॥ इति ॥

अन्यत्रापि—

सिन्धु-सौवीर-सौराष्ट्रांस्तथा प्रत्यन्तवासिनः ।
अङ्ग-वङ्ग-कलिङ्गांश्च गत्वा संस्कार मर्हति ॥ १ ॥
म्लेच्छदेशे तथा रात्रौ सन्ध्यायां विप्रवर्जिते ।
न श्राद्धमाचरेत् विद्वान्न चाकाशे कदाचन ॥ २ ॥

"म्लेच्छदेशे तथारात्रौ सन्ध्ययोश्च विशेषतः ।
न श्राद्धमाचरेत् प्राज्ञो म्लेच्छदेशे न च व्रजेत्" ॥ ३ ॥
"न म्लेच्छविषये श्राद्धं कुर्यात्" ।
"न गच्छेन्म्लेच्छविषयम्" ( इति वसिष्ठः ) ॥ ४ ॥
न म्लेच्छपतितैः सार्द्धं न वदेच्च निषिद्धकम् ॥ ५ ॥
म्लेच्छावासे तथा पद्मं यो वर्तेत स पातकी ॥६॥ (इत्युशनाः)
चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ।
स म्लेच्छदेशो विज्ञेय आर्य्यावर्तस्ततः परः ॥ ७ ॥
यत्र पानमपेयस्य देशेऽभक्ष्यस्य भक्षणम् ।
अगम्यागामिता यत्र तं देशं परिवर्जयेत् ॥ ८ ॥ (पराशरः)

इत्येवमादिभिर्वाक्यजातैर्विष्णुशङ्खोशनः पराशरवशिष्ठादयो म्लेच्छदेशगमनप्रतिषेधंविदधते । तथा च "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छती"–ति वचनादवश्यं प्रत्यन्तदेशप्रस्थाता प्रत्यवैतीति सिद्धम् ॥ २ ॥

एवमेव म्लेच्छदेशं गतवतोऽवश्यमेव पतित संसर्गितया प्रतिषिद्धानां केषांचिदुपभोग्यजातानामुपसंग्रहणं नाप्राप्तं भवतीत्यसदनुष्ठाननिबन्धनः प्रत्यवायः प्रसज्जते ।

तथाहि—

१—यन्न सर्वार्थमुत्सृष्टं यच्च म्लेच्छनिपानजम् ।
तद्वर्ज्यं सलिलं तात स्नान पानादि कर्म्मसु ॥ १ ॥

इति हेमाद्रौ ब्रह्माण्डपुराणवचनम् ।

२—निरुद्धासु न कुर्वीरन्नंशभाक् तत्र सेतुकृत् ।
तस्मात् परकृतान् सेतून् कूपांश्च परिवर्जयेत् ॥ १ ॥

इति बौधायनस्मृतिः ।

३—चाण्डालैः खानिताः कूपा ये च प्रत्यन्तदेशजाः ।
अन्त्यावसायिभिर्भुक्ताः स्नानादौ तान् विवर्जयेत् ॥ १ ॥

इति वृद्धपराशरः ।

४—परनियानेष्वयः पीत्वा तत्साम्य मुपगच्छतीतिस्मृतिः ।

५—न नावि भुञ्जीत—इति आपस्तम्बसूत्रम् ।

६—प्रत्यन्तदेशजं शाकं धान्यं प्रत्यन्तदेशजम् ।
ऐक्षवं च धृतं क्षीरमामिषं परिचक्षते ।

इति सत्यव्रतः ।

७—चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्छति ॥

इति मनुसुमन्तू ।

८—शूद्रान्नं शूद्रसंपर्कः शूद्रेण तु सहासनम् ।
शूद्राज्ज्ञानागमः कश्चिज्ज्वलन्तमपि पातयेत् ॥

९—आसनाच्छयनाद्यानात् संभाषात् सहभोजनात् ।
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ॥

इति पराशरः ।

१०–एक शय्यासनं पङ्क्ति ( ङ्क्ति ) भण्डिपक्त्य ( ङ्क्त्य )
न्नमिश्रणम् ।

याजनाध्यापने योनिस्तथा च सहभोजनम् ।
नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सह ॥

इति बृहस्पतिः ।

११–संसर्गमाचरन् विप्रः पतितादिष्वकामतः ।
पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा ॥
मासार्द्धं मासमेकं वा मासत्रयमथापि वा ।
अब्दार्धमेकमब्दं वा भवेदूर्ध्वं तु तत्समः ॥

इति पराशरः ।

१२–संवत्सरेण पतति पतितेन सहाचरन् ।
भोजनासनशय्यादि कुर्वाणः सार्वकालिकम् ॥

इतिमिताक्षरा ३ अध्या० २६१ श्लो० ।

१३—नैकवासा न च द्वीपे नान्तरिक्षे कदाचन।
श्रुतिस्मृत्युदितं कर्म न कुर्य्यादशुचि क्वचित्॥

इति स्मृतिसारे।

१४—चण्डालश्रोत्रावकाशे श्रुतिस्मृतिपाठे एकरात्रमभोजनम्।

इति षट्त्रिंशन्मतम्।

इत्येवंविधानेकवाक्यबोधितप्रतिषेधविषयाणां म्लेच्छ-देशेनान्तरीयकतया सिद्धेन पतितसंसर्गेण दूषिताहारविहार-नित्यनैमित्तिककर्म्मानुष्ठानादिविषयजातानामनुष्ठानानुष्ठान-योरुभयथापि कर्म्मातिपातसम्भवादवश्यं तादृशयतित संसर्गं कुर्वाणस्य त्रैवर्णिकस्य पतित्वयोग्यता प्राप्नोतीति सिद्धम्।

तदिदमपरे न क्षमन्ते। सर्वेषामेषां वचनजातानां विभि-न्नविषयकतया प्रकृतविधायां समुद्रयातायां लेशतोऽप्यलब्ध-विषयकत्वेन दोषानाधायकत्वात्। तथा हि—नारदपुराणा-दित्य पुराणवचनाभ्यां कलिवर्ज्यत्वम्-मनुमरीच्यादिवच-नाभ्यां श्राद्ध वर्ज्यत्वम् पाराशरबौधायनवचनाभ्यामेकवाक्य तया ब्राह्मण वर्ज्यत्वं चेत्येवं तावत् त्रीणि प्रकरणानि समुद्र-यात्रा प्रतिषेधस्य लभ्यन्ते। अन्यथा हि यदि नारदीयादि-पुराणवचनानां मानवादिस्मार्तवचनानां चाविशेषेण समु-द्रयान प्रतिषेधपरतयासमानविषयत्वमभ्युपेतं स्यात्तर्हि मन्वा-

दिस्मृतिबोधित सर्वयुगसाधारण प्रतिषेधविषयभूतायाः समुद्रयात्रायाः केवलं कलियुगावच्छेदेन प्रतिषेध्यतासमर्पकनारदीयादि पुराण वचन व्याकोपापत्तिः । युग विशेषानुपादानात् सर्व युग साधारण्येनानुष्ठेयतया विहितानां केषांचित् कर्मणां कलिकालात्मक समय विशेषावच्छेदेन निषेधाविधानौचित्येऽपि सर्वदानिषिद्धस्य कलिमात्रपरतया निषेध विधानानौचित्यात् । न च पौराणिकवचनैकवाक्यतानुरोधेन मन्वादिस्मृति वचनानामपि कलिविषयकत्वेन व्याख्यानं युक्तम् सर्वयुग प्रतिषिद्धागारदाहगरदानादिसाहचर्येण पठितस्य समुद्रयानस्य युगान्तरविधेयत्वप्रतिपत्तेरनवसरदुःस्थत्वात् ।

यत्तु- "मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्" इतिसामान्यनिषेधस्य "पृथक्चितिंसमारुह्य न विप्रा गन्तुमर्हति" इतिविशेषे उपसंहारवदिहापि मन्वादिवचनेन सर्वयुगसाधारणः समुद्रयात्रा प्रतिषेधःपौराणिकवचनेन कल्यात्मकयुगविशेषे उपसंहृयते-इत्यतस्तस्य कलिविषयकत्वसिद्धावप्यन्येषामगारदाहादि प्रतिषेधानां विषयसंकोचे प्रमाणाभावात् सर्वयुगसाधारण्यमेवावतिष्ठते-इत्येवं कश्चिद्ब्रूयात्-तत्तुच्छम् । तावतापि मन्वादिवचनेन कलौ समुद्रगन्तुर्ब्राह्मणस्य श्राद्धवर्ज्यत्वसिद्धौ "द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः" "एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।

निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः" इत्येतत्पौराणिक वचनस्य श्राद्धविषयकत्वमनपेक्ष्यैव प्रवर्तमानस्याक्षरस्वारस्यभङ्गापत्तेः। मन्वादिबोधितधर्माणां कलिविषयकत्व व्यवस्थायाः "कृते तु मानवा धर्माः" इत्यादिस्मार्तवचनाक्षरस्वारस्यविरुद्धत्वाच्च।

तस्मादवश्यं तानि पौराणिकस्मार्तवचनानि विषयभेदेनैव व्यवतिष्ठमानानि सन्तीति वक्तव्यम्। तथा च सर्वयुगसाधारण्येन तावच्छ्राद्धकर्माणि समुद्रयायिनः प्रतिषेध इति धर्मस्मृत्यर्थः।१। कलियुगावच्छेदेन तु सर्वस्मिन्नेव कर्मणि समुद्रयायिनः प्रतिषेध इति पुराणार्थः।२। ब्राह्मणविषयकश्चायं प्रतिषेधो न तु सर्ववर्णसाधारण इत्युपसंहारस्मृत्यर्थः।३। इत्येवं विषयभेदेन व्यवतिष्ठमानानां तेषां वचनानां स्वस्वविषये निष्प्रतिपक्षं प्रवर्तमानतया नास्ति परस्परोपमर्द इति सामञ्जस्यम्। तथा चोक्तरीत्या त्रिधा सिद्धेषु समुद्रयात्राप्रतिषेध प्रकरणेषु प्रतिषेध्यतया निरूपिता समुद्रयात्रा किंरूपा विवक्ष्यत इति चिन्त्यते। किं सर्वत्र सर्वजातीयैव समुद्रयात्रा प्रतिषिध्यते-उत सर्वत्रैकजातीया अथवा प्रतिप्रकरणं भिन्न जातीया- इति।

इयं हि तावत् समुद्रयात्रा षोढा प्रस्तूयते। प्रायश्चित्ताङ्गभूता (१) तीर्थयात्राङ्गभूता (२) शिक्षा-समर-वाणिज्य-

व्यवसायाद्युद्देशेन प्रत्यन्तदेशगमनाङ्गभूता (३) बलवद्राजनि-देशादि विशिष्टनिमित्तेन प्रत्यन्तदेशगमनाङ्गभूता (४) जीविकाङ्गभूता (५) चित्तविनोदार्था (६) चेति। तत्र समुद्रयात्रा स्वीकार इत्येनेन पौराणिकवचनेनाविशेषात् सर्वविधाया एव समुद्रयात्रायाः प्रतिषेध इष्यते, आहोस्वित् कस्यश्चिदेकस्या इत्यादि प्रतिपित्सायां तावद् विशेषात् सर्व विधाया एवेति सामान्या अभिमन्यन्ते। तदसत्। द्वारकादिकतिपय-तीर्थोद्देशेन विधीयमानायाः समुद्रयात्राया अपि प्रतिषेध्य-दलप्रवेशापत्तेः। न चेष्टापत्तिः। सार्वदेशिकसकल शिष्टाचार-विरोधापत्तेः। तस्माद् वश्यं काचिदेव समुद्र यात्रा प्रतिषेध्या न सर्वापीत्येवं स्थिते कस्याः प्रतिषेध्यत्वमप्रतिषेध्यत्वं वेति विविच्य ग्रहीतुमिदानी तेषां वचनानामैदम्पर्यं निरूप्यते। तथा हि तावद्द्वीपान्तरगमनाङ्गभूतायाः समुद्रयात्रायाः श्रुतितः स्मृतितश्च दोषानुपलम्भाद् अप्रतिषिद्धमनुमतं भवतीति न्यायेन प्राप्ता कर्तव्यता। अतएव पुराकाले त्रेतायां द्वापरे तथा कलिकालऽपि चिरादद्यावध्यनुवर्तमानः समुद्र-यात्राविषयकः शिष्टाचारोऽपि दृश्यते। स चाऽवश्यं तत्क-र्तव्यतानुज्ञानाय प्रमाणं भवितुमर्हति। "अथ यदि ते कर्म्म-विचिकित्सा वा वृत्तविचिकित्सा वा वृतविचिकित्सा वा स्याद् ये तत्र ब्राह्मणाः संमर्शिनो युक्ता आयुक्ता अलूचा धर्मकामाः स्युः-यथा ते तत्र वर्तेरन तथा तत्र वर्तेथाः"

इत्यादि श्रौतवाक्यैः "श्रुतिः स्मृतिः सदाचारो धर्म्ममूलमिदं स्मृतम्" इत्यादिस्मार्तवाक्यैश्च पारम्पर्य्या गताचारस्य श्रुतिस्मृत्यविरुद्धस्य धर्म्ममूलत्वाभ्युपगमात् ॥ त हि पुराकाले तावद् ऋक्संहितायाम्—

तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन् ममृवां अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥ १ ॥
तिस्रः क्षपास्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षलश्वैः ॥२॥
अनारम्भणे तदवीरयेथा मनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ॥३॥

इत्येवं राजर्षिकुमारस्य भुज्योः समुद्रमार्गेण नावमारुह्य द्वीपान्तरगमनं वर्ण्यमानं श्रूयते । उक्तं चेदमुपाख्यानं मन्त्रार्थभूतं भाष्यकारेण सायणीये । यथा—

तुग्रो नाम कश्चिद्राजर्षिः । स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौर्म्मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्नाऽभूत् । तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव । तौ च स्तुतौ सेनासहितं तमात्मीयासु नौष्वारोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति ।

ऐवमेव—

आ यद् रुहाव वरुणश्च नावं प्र यत् समुद्रमीरयाव-
मध्यम् ।
अधि यदपां स्नुभिश्चराव प्रेङ्ख ईङ्खयावहै शुभेकम् ॥ १ ॥
वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपामवोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्तु द्यावस्त नन्या दुषा सः ॥२॥

इत्येवमादिना ब्राह्मणस्यापि महर्षेर्वसिष्ठस्य तदितरेषां चोपादेय चरितानां मन्वादीनामन्यत्र श्रौतप्रकरणेषु समुद्र-यानद्वीपान्तराभिगमनमुदग्रं श्रूयते। न तु समुद्रयानं न कुर्य्यादित्येवं तन्निषेधः कुत्रापि वेदे श्रूयते। तस्मादेतदुप-पद्यते समुद्रयाने दृढं लिङ्गम् ॥

तथा त्रेतायामपि —

संग्राम निर्विष्ट सहस्र बाहुरष्टादश द्वीपनिखातयूपः ।
अनन्य साधारणराजशब्दो बभूव योगीकिल कार्तवीर्य्यः ॥

६ स० ३८ श्लोक

इति सर्वत्र प्रसिद्धे रघुवंशे पुराणोपाख्यानमूलके कार्त-वीर्यस्य द्वीपान्तरगमनं समुद्रयानैकोपायसाध्यं प्रवर्ण्यते। न चैतावता स्वतो गमनं न प्राप्नोति, भृत्यद्वाराऽप्येतदर्थ-निर्वाहसंभवादिति वाच्यम्। यज्ञ कर्मणि यजमानप्रत्यासत्ते रावश्यकत्वाद्- अकारणमेवमर्थकल्पनाया अप्रमाणिकत्वा-

त् । ब्राह्मणसाध्येतिकर्तव्यताकस्य यज्ञकर्मणस्तत्प्रत्यासत्ति-मन्तरेणानिर्वाहाद् ब्राह्मणादीनां त्रैवर्णिकानां समुद्रयानेन द्वीपान्तर गमनस्येदानीमपि नाप्राप्तत्वाच्च ।

अथ द्वापरान्तेऽपि—

ताम्रलिप्तं च राजानं कर्वटाधिपतिं तथा ।
सुह्मानामाधिपं चवै ये च सागरवासिनः ॥ १
सर्वान् म्लेच्छगणांश्चैव विजिग्ये भरतर्षभः ।
एवं बहुविधान देशान् विजित्य पवनात्मजः ॥ २ ॥
वसु तेभ्य उपादाय लौहित्यमगमद्बली ।
स सर्वान् म्लेच्छनृपतीन् सागरानूपवासिनः ॥ ३ ॥
करमाहारयामास रत्नानि विविधानि च ॥ ४ ॥ इति

दिशं धनपतेरिष्टामजयत् पाकशासनिः ।
भीमसेनस्तथा प्राचीं सहदेवस्तु दक्षिणाम् ॥ १ ॥
प्रतीचीं नकुलो राजन् दिशं व्यजयतास्त्रवित् ॥ १ ॥
स तेन सहितो राजन् सव्यसाची परन्तपः ।
विजिग्ये शाकलं द्वीपं प्रतिविन्ध्यं च पार्थिवम् ॥ २ ॥
शाकलद्वीपवासाश्च सप्तद्वीपेशु ये नृपाः ।
अर्जुनस्य च सैन्यैस्तैर्विग्रहस्तुमुलोऽभवत् ॥ ३ ॥

स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोऽभवत् ।
अन्यैश्च बहुभिर्योधैः सागरानूपवासिभिः ॥ ४ ॥
वशे चक्रे महातेजा दण्डकांश्च महाबलः ।
सागरद्वीपवासांश्च नृपतीन् म्लेच्छयोनिजान् ॥ ५ ॥

निषादान् पुरुषादांश्च कर्णप्रावरणानपि ।
ये च कालमुखा नाम नरराक्षसयोनयः ॥ ६ ॥

कृत्स्नं कोलगिरं चैव सुरभीपट्टनं तथा ।
द्वीपं ताम्राह्वयं चैव पर्वतं रोमकं तथा ॥ ७ ॥

रामठान् हारहूणांश्च प्रतीच्यांश्चैव ये नृपाः ।
तान् सर्वान् स वशे चक्रे शासनादेव पाण्डवः ॥ ८ ॥

ततः सागरकुक्षिस्थान् म्लेच्छान् परमदारुणान् ।
पह्लवान् वर्वरांश्चैव किरातान् यवनान् शकान् ॥ ९ ॥

इत्येवं महाभारतप्रकरणेभ्यो धार्म्मिकप्रवराणामपि समुद्रयात्रापूर्वकद्वीपान्तरगमनं पातकगन्धमप्यनाघ्राय स्मर्य्यते ।

अथेदानीं कलियुगेऽपि—कल्हणस्य राजतरङ्गिण्याम्—
"सान्धिविग्रहिकः सोऽथ गच्छन् पोतच्युतोऽम्बुधौ ।
प्राप पारं तिमिग्रासात् तिमिमुत्पाट्य निर्गतः"

इति जयापीडस्य राज्ञस्तथाऽन्यत्र मिहिरकुलराजस्य च सिंहलद्वीपं गच्छतः समुद्रयात्रा सपरिकरं वर्णिता। रत्नावली नाटकेऽपि—कलियुगनृपस्य वत्सराजस्याज्ञया तदमात्ययोर्योगन्धरायणबाभ्रव्ययोयु द्धार्थं समुद्रयानं वर्ण्यते। एवं "कमलादिवोत्पलम्"-इति रघुवंशस्थोपमावचनमाक्षेप्तुं "कमलात् कमलोत्पत्तिश्रूयते न च दृश्यते"—इति कथयतः सिंहलद्वीपाधीश्वरस्य कुमारदासस्योत्तरदानाय कालिदासस्य सिंहलद्वीपगमनं तत्र—"बाले तव मुखाम्भोजात् कथमिन्दीवरद्वयम्" इत्युत्तरदानं च सुप्रसिद्धमेव जानकीहरणकाव्यकर्तृ कुमारदासचरितविदाम्। अद्यापि कोङ्कणस्थाः समुद्रतीरस्थाश्च सर्वे वर्णा असकृद् व्यापाराद्यर्थं सर्वतः समुद्रमार्गेण गतागतं कुर्वाणाः प्रायश्चित्तमकुर्वाणाश्च संगृहीता एव भूयसा दृश्यन्ते।

तदित्थं पुराकल्पादारभ्येदानीं यावदविच्छिन्नपरम्परासिद्धयोरार्य्यसन्तानानां समुद्रयानद्वीपान्तराभिगमनयोरयमाचार एव होलाकाधिकरणन्यायेनानुष्ठाने प्रमाणं स्यात्। यत्तु समुद्रयात्रायाः कलिमात्रनिषिद्धाया युगान्तरेष्व प्रतिषिद्धत्वादिह तदाविच्छिन्नपारम्पर्य्य दिदर्शयिषया प्रदर्शितानि भुज्युवसिष्ठादिनदर्शनात्मकश्रौतादि वचनजातानि न त्वेवकलौसमुद्रयात्रानु ज्ञानाय प्रमाणं भावे तुमर्हन्ति. विधिनिषेधयोः प्रकरणभेदेनाविशेषादिति कश्चिद् ब्रूयात्-तन्न श्रद्धे-

यम्। सर्वयुग साधारण्येन समुद्रयात्रा प्रतिषेधकमन्वादि स्मार्तवचनस्य श्रौतनिदर्शनविरुद्धतायाः जागरूकत्वात्। सत्र...... ......................................

इतिस्मृतेर्वेदार्थभूतया मनुक्त्या श्रुत्युनुमानादनुमित श्रुतेर्भुज्युवसिष्ठादिनि दर्शनादि श्रुतेश्चपरस्परविरोधस्या परिहार्य्यत्वाच्च ॥ तस्मादवश्यमुभयोः सामञ्जस्य संसिद्धये-विषय भेदः कल्पयितव्यो भवतीति भुज्युवसिष्ठादि निदर्शन श्रुत्या द्वीपान्तर गमनाङ्ग भूत समुद्रयात्रायां विधिः अथ तदितर प्रकारक समुद्रयात्रा सम्बन्धेन मन्वादिबोधितः सर्वयुग साधारणः प्रतिषेध इति संसिध्यत्युभयोः सामञ्जस्यम्। तस्माद् द्वीपान्तरगमनाङ्गभूतादीनां समुद्रयात्राणां सिद्धमप्रतिषिद्ध-त्वम्।

यत्तुकलियुगावच्छेदेन—

समुद्रयात्रास्वीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥ १ ॥

देवराच्च सुतोत्पत्तिर्मधुपर्के पशोर्वधः।
मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥ २ ॥

दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च।
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ॥ ३ ॥

महाप्रस्थानगमनं गोमेधश्च तथा मखः ।
इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥ ४ ॥

इति शास्त्रेण सामान्यतः सर्वविधसमुद्रयात्रायाः प्रतिषेधो विधीयत इति केचिदाक्षिपन्ति । तदसत् । अत्रैतेषां कलिवर्ज्यतया परिगणितानां त्रयोदशानां मध्ये समुद्रयात्रातिरिक्तानां सर्वेषां वचनतः सिद्धानामेवेह प्रकरणविशेषे निषेधविषयीकरणात्तत्साहचर्यपठितायाः समुद्रयात्राया अपि वचनविहिताया एव ग्रहीतुमौचित्यात् । अत एवोपसंहारे "इमान् धर्मान्" इत्युक्तं सङ्गच्छते । अन्यथा शास्त्रे धर्मपदप्रयोज्यतात्पर्यीयविषयताश्रयत्वेन शास्त्रविधिसिद्धानामेवार्थानां विवक्षिततया समुद्रयात्रायाः कलेः पूर्वं केनापि विशिष्टेन वचनेन सामान्यतः कर्तव्यतया विध्यदर्शनादिमान् धर्मानिति कथनमसमञ्जसं स्यात् । तथा चाविहिताप्रतिषिद्धानां प्रत्यन्तदेशगमनाङ्गभूतादीनामेतद्धर्मपदप्रयोज्यविषयताश्रयत्वेनाभ्युपगन्तुमयोग्यतया न तत्प्रतिषेधायेदं वचनं प्रभवतीति सिद्धम् ।

एवं तीर्थयात्रां विना गत्वेति वाक्यशेषेण सर्वस्यैव प्रतिषेध्यप्रदेशप्रतिषेधस्य तीर्थयात्रातिरिक्तत्वेनैव सङ्कुचितविषयतया द्वारकादिकतिपयतीर्थोद्देशेन समुद्रयात्रायाः शिष्टाचारसिद्धतया च न तीर्थयात्राङ्गभूतायामपि तस्यामस्य निषे-

धस्यप्रवृत्तिः । तथा चानेन वचनेनाविशेषात् प्रायश्चित्ताङ्ग-भूताया एव समुद्रयात्राया निषेधः पर्य्यवस्यति । एतदभि-प्रायेणैव धर्म्मार्थं नावा समुद्रे यानं न कार्य्यमित्येवं व्या-ख्यातं रघुनन्दनाचार्य्यैर्मनुस्मृतिव्याख्याकृद्भिः । सा चेयं धर्म्मयात्रा ब्रह्महत्यादुरितोपनिवर्तकत्वेन तावत्सामान्यतो विहिता । तथा च पाराशरी स्मृतिः ।

चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ।
समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् ॥ १ ॥ ६४

दशयोजनविस्तीर्णं शतयोजनमायतम् ।
रामचन्द्रसमादिष्ट नलसंचयसंचितम् ॥ १२ ॥ ६६

सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति ॥ ६९
सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेत सागरम् ॥

यजेत वाश्वमेधेन राजा तु पृथिवीपतिः ॥१२ । ७०इति

अत्र दशयोजनविस्तीर्णमित्यादि विशेषणस्वारस्येन तादृशयोजनायामविस्तारविशिष्टस्यैव सेतोर्दर्शनस्य ब्रह्मवध दुरितापनोदकत्वेन विधानात्तस्य च समुद्रयात्रामन्तरेणा-संभवादर्थतस्तदङ्गभूतायाः समुद्रयात्राया विधिः । तस्याश्च कलिशास्त्रविहितायाः स्वाश्रयसेतुद्रष्टृपुरुषानुगतब्रह्महत्या-जनितनिरयप्रसञ्जकदोषनिवृत्त्यौपयिकशक्तिविशिष्टाया अप्य-नुष्ठातुर्नास्मिन् लोके प्रत्यासत्तिर्विद्यते कल्मषं तु निर्हण्यते–

इत्यर्थमावेदयितुमिदं कलिवर्ज्यप्रकरणगतं शास्त्रमुपतिष्ठते "समुद्रयात्राऽस्वीकार" इति। अनयोश्च ब्रह्मवधप्रायश्चित्तप्रकारविधिनिषेधयोः कलिनियततया स्थाने कलिवर्ज्यप्रकरणे तन्निषेधस्यापि प्रवेश इति बोध्यम्।

ब्रह्मवधे हि मरणान्तिकप्रायश्चित्तविधानान्मरणे च विधीयमाने दोषनिवृत्तावपि लोकव्यवहार्य्यत्वादर्शनात्तदनुकल्पतया विहितानां सर्वेषामितरेषामपि ब्रह्मवधप्रायश्चित्तानां व्यवहार्य्यतासमर्थकत्वं नास्तीत्यतः समुद्रसेतुयात्राया अपि ब्रह्महत्याजनितदोषद्वयमध्ये निरयोत्पादकशक्तिरूपदोषनिवर्त्तकत्वेऽप्यव्यवहार्य्यत्वरूपदोषनिवर्त्तकत्वं नास्तीत्यत्रैव तत्तात्पर्य्यं लभ्यते।

एवमन्येष्वपि सर्वेषु ब्रह्मवधप्रायश्चित्तेषु कृतप्रायश्चित्तस्याप्यसंव्यवहार्य्यत्वं ब्रह्महत्यादोषस्यातिगुरुत्वादुपपद्यमानमन्यत्र व्यवस्थाप्यते तथा हि—

अथ खल्वयं पुरुषो येन कर्म्मणा लिप्यते। अथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति च, तत्र प्रायश्चित्तं कुर्य्यान्न कुर्य्यादिति मीमांसन्ते। न कुर्य्यादित्याहुः न हि कर्म्म क्षीयत इति। कुर्य्यादित्यपरे। पुनः स्तोमेनेष्टवा पुनः सवनमायातीति विज्ञायते। व्रात्यस्तोमेनेष्ट्वा तरति सर्वं पाप्मानम्, तरति ब्रह्म-

हत्यां योऽश्वमेधेन यजतेऽग्निष्टुताभिशस्यमानं याजयेद् ।

इति भगवता गौतमेन कामाकामकृतसर्वविधब्रह्मवधशोधने विहितेऽपि—

सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति ।
यजेत वाश्वमेधेन राजा तु पृथिवीपतिः ॥ १ ॥

इति भगवता पराशरेण सगुणनिर्गुणसाधारणब्रह्मवधनिष्कृतिसाधने विहितेऽपि यदिदं मनुधर्मे—

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥ १ ॥ इति ।

यच्चेदं भविष्यपुराणे—

गुणान्वित तु यो विप्रं गुणहीनस्तु क्षत्रियः ।
क्षिणोति बुद्धिपूर्वं तु न भवेत्तस्य निष्कृतिः ॥ १ ॥

विट्शूद्राणां विशेषेण हनतां कामतो द्विजम् ।
प्राणान्तिकी भवेत्पुत्र कामतो निर्गुणे हते ॥ २ ॥

सगुणे निहते कामान्निष्कृतिर्न विधीयते ॥ २ ॥

इत्येवमन्यत्र च निष्कृत्यभाववचनानि पठ्यन्ते । तेषां सत्यपि नरकनिवृत्तिप्रयोजके प्रायश्चित्ते व्यवहार्य्यत्वप्रयोजकप्रायश्चित्ताभावप्रतिपादकत्वमेवावसीयते । तथा चाह प्राय-

श्चित्तविवेककारः—"वस्तुतस्तु निष्कृत्यभाववचनं मरणविकल्पितचतुर्विंशतिवार्षिकप्रायश्चित्तेऽपि कृते व्यवहार्य्यताभावपरम्—न तु प्रायश्चित्ताभावार्थम्"—इति। अथैतट्टीकाकृद्गोविन्दानन्दोऽपि—"वस्तुतस्त्वति। क्षत्रियादीनां सगुणब्राह्मणवधे भविष्यमनुवचनाभ्यां निष्कृतिर्नास्तीति यदुक्तं तद्व्यवहार्य्यताविषयम्" इत्याह। एवञ्च चतुर्विंशतिवार्षिकव्रतरूपे ब्राह्महत्याप्रायश्चित्ते चरितेऽपि व्यवहार्य्यत्वं नास्तीत्यसन्तुष्य यदि कश्चित्—"सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति" त्यत्रकलीप्रायश्चित्ते व्यवहार्य्यत्वाभावप्रतिपादकमक्षरमदृष्ट्वा तत्सिद्ध्यभिमानेन प्रवर्त्तमानः स्यात्तादृशं पुरुषं प्रत्येवेदमुपतिष्ठते प्रकरणान्तरस्थसंवादिशास्त्रम्—"समुद्रयात्रास्वीकारः कलौ वर्ज्य" इति। समुद्रयात्रायाः स्वीकारः संग्रहसिद्धिपर्य्यन्तो नास्तीति वा, समुद्रयात्रायां कृतायामपि तस्य स्वीकारो नास्तीति वा, समुद्रयात्रयापि ब्रह्मघातिनः स्वीकारो नास्तीति वा, तदर्थः। एतमेवार्थं स्पष्टमावेदयितुं वचनान्तरैकवाक्यतानुरोधेन निर्णयसिन्धौ "समुद्रयातुः स्वीकारः" इति पाठः प्रकल्पितो दृश्यते। एतदर्थानुमोदनपराण्येव च—

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः।

इत्यादीनि वचनानि द्रष्टव्यानि। ब्रह्महत्याप्रायश्चि-

त्तार्थं समुद्रे नौकया गच्छतो निवृत्तहत्याकल्मषस्यापि व्यवहार्य्यत्वं नास्तीति तदर्थात्। यत्तु समुद्रं नौकया यातुः समुद्रयानप्रयुक्तदुरितोपशान्त्यर्थं कृतप्रायश्चित्तस्यापि व्यवहार्यत्वं नास्तीति केचिदर्थमुपकल्पयन्ति, तदसत्। निर्द्दिष्टरीत्या पुराकल्पादारभ्येदानीं यावदविच्छिन्नपरम्परासिद्धसमुद्रयात्राकर्तॄणां प्राचां व्यवहार्य्यत्वाभावस्य दूषितत्वकलङ्कस्यापि वा कुत्राप्युपाख्यानादावस्मरणात्तद्विरोधाच्चैतादृशार्थस्याप्रामाणिकत्वात्। ईदृशार्थतात्पर्य्यग्राहकवचनान्तरानुपलम्भेन तथा भूतार्थस्य स्वकपोलकल्पितत्वाच्च। सम्भवत्यर्थद्वये वचनान्तरानुगृहीतस्यैवार्थस्य प्रामाणिकतया ग्रहीतुमौचित्यात्। न हि समुद्रयात्रायाः स्वातन्त्र्येण पातित्यप्रयोजकत्वे तादृशपातित्यशोधनस्य वा व्यवहार्य्यत्वप्रयोजकत्वाभावे किञ्चिद्वचनान्तरं प्रमाणमुपलभामहे यदेकवाक्यतानुरोधेनैतस्य वाक्यस तदर्थे तात्पर्य्यं सुगृहीतं स्यात्। तस्मादनुपादेयमेतत्।

यच्च संस्कारकौस्तुभकृता—"द्विजस्याब्धौ तु नौयातुः शोधितस्याप्यसंग्रहः। इति वचनात् प्रत्यन्तदेशगमननिमित्तपुनःसंस्कारे कृतेऽब्धौ नौयातुः संसर्गः कलौ निषिध्यते" इत्येवमस्य तात्पर्य्यमाख्यातम्। तदिदंपूर्वापेक्षया ऽप्यतितरामयुक्तं दृश्यते। शोधितस्याप्यसंग्रह इति पाठस्यैव स्वयं

तेन प्रकल्पिततया तावदप्रामाणिकत्वात् । अन्यथा हि तादृशपाठसत्त्वे एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्तितानि कर्म्माणीत्येवमुपसंहारस्थवाक्यैकवाक्यतया शोधितस्याप्यसंग्रहः कलेरादौ महात्मभिर्निवर्तित इत्यर्थे संप्रसक्ते स्वाविष्ठितशाखाछेदप्रसङ्गः स्यात् ॥ १ ॥

किञ्च—"प्रत्यन्तदेशगमननिमित्तपुनः संस्कारे"—इति वदता प्रत्यन्तदेशगमनाङ्गभूतसमुद्रयात्राविषयकत्वमेतद्वचनस्य मन्यमानेन तस्याः स्वतो दोषप्रसञ्जकत्वं नास्तीति सुव्यक्तमभिमन्यते । तथा च तन्मते प्रत्यन्तदेशगमनप्रयुक्तस्यैव दोषस्यापाद्यमानतया तस्य च प्रकृतायां समुद्रयात्रायां दोषानुत्पादकत्वेन निरूपयिष्यमाणत्वान्नास्ति प्रकृते समुद्रयातुर्दोषलेश इत्यवधेयम् ॥ २ ॥

यदि तु प्रत्यन्तदेशगमनाङ्गभूतसमुद्रयात्रायां द्वेधा पातकमुपपद्यते प्रत्यन्तदेशसम्बन्धनिबन्धनं समुद्रयात्रानिबन्धनञ्च । तत्र प्रत्यन्तदेशप्रायश्चित्ते कृतेऽपि समुद्रयात्रादोषानपनोदादव्यवहार्य्यत्वमस्तीत्येवमस्य तात्पर्य्यं कश्चिद्ब्रूयात् । तत्तुच्छम् । इतरपापप्रायश्चित्ते कृतेऽपीतरपापानिवृत्तिर्नास्तीत्यर्थस्य स्वतः प्रसिद्धत्वात्तदर्थमीदृशवचनानावश्यकत्वात् । न च समुद्रयात्रानिबन्धनपातकापनोदकं प्रायश्चित्तं नास्तीत्यत्रैव तत्तात्पर्य्यं भविष्यतीति वाच्यम् ।

समुद्रयानगमनं ब्राह्मणस्य न शस्यते ।

संभवेद्यदि मोहेन पुनः संस्कारमर्हतीति पराशरवचने तस्यापि जागरूकत्वात् । तस्मादशुद्धमेवेदं व्याख्यानमिति स्पष्टम् ॥ ३ ॥

वस्तुतस्तु कलिवर्ज्यतयाभिप्रेतानामर्थानां सति सम्भवे सामञ्जस्येनैव प्रतिपत्तव्यतया नारदीयपुराणादित्यपुराणवचनयोः समुद्रयात्राप्रतिषेधपरयोः समानविषयतयैवाभ्युपगन्तुमौचित्याद्धर्म्मार्थयात्राया एवोभयत्र निषेध्यतासिद्धौ प्रत्यन्तदेशगमनाङ्गभूतसमुद्रयात्राविषयकत्वेन व्याख्यानं सर्वथा निर्मूलमेवेति विदांकुर्वन्तु विद्वांसः ॥ ४ ॥

तदित्थं मनुस्मृतिव्याख्याकृद्रघुनन्दनव्यवस्थानुसारेण धर्म्मार्थसमुद्रयात्रानिषेधपरयोर्नारदीयादित्यपुराणवचनयोः प्रत्यन्तदेशगमनाङ्गभूतादिसमुद्रयात्रासु दोषापादकत्वं नास्तीति सिद्धम् ॥

## इति समुद्रयात्रायाः कलिवर्ज्यताखण्डने प्रथमः प्रकारः ॥ १ ॥

अथाभियुक्तास्तु यावत्कलिवर्ज्यसाधारण्येन विषयविशेषव्यवस्थानमभ्यनुजानाना इत्थमाचक्षते। एतस्मिन् कलिवर्ज्यप्रकरणे नैकरूपेण सर्वे सर्वत्र निषेधाः प्रवर्तन्ते। क्वचित्तु सामान्यशास्त्रविहिता एवार्था विशेषे निवर्त्यन्तेक्वचिच्च रागप्राप्ताः। क्वचित्पुनर्दृष्टदोषप्रसञ्जकाः। अथैवं क्वचिच्छक्तिवैकल्यादिना सामान्यमनुष्यैः कर्त्तुमशक्या एवार्था अनुग्रहेणाभ्यनुज्ञारूपेण निवर्त्यन्ते। तदित्थं विषयभेदानुरोधेन प्रतिषेधप्रकारभेदस्य विवक्षितत्वाल्लोकस्थित्यनुसारेणैव च प्रतिषिद्धार्थेषु प्रतिषेधस्य व्यवस्थितत्वादिह प्रकरणशेषे "लोकगुप्त्यर्थं व्यवस्थापूर्वकं निवर्त्तितानि" त्येवमुक्तं संगच्छते। अन्यथा नैतानि कलौ कुर्य्यादित्येवावक्ष्यत्। तस्मादस्त्येव कस्यचित् प्रतिषेधविधेरिष्टजनकत्वाभावविशिष्टबलवदनिष्टानुबन्धित्वरूपार्थपर्य्यवसायित्वादर्थदृढत्वमथान्यस्य तावदर्थापेक्षत्वाच्छिथिलत्वमिति विविच्य तत्तद्द्रष्टव्यम्। षोढा ह्ययं प्रतिषेधविधिर्व्यवस्थापितो मीमांसातन्त्रे—सामान्यप्रतिषेधः—विशेषप्रतिषेधः—प्रतिप्रसवरूपः प्रतिषेधः—अभ्यनुज्ञारूपः प्रतिषेधः —उपसंहाररूपः प्रतिषेधः—व्यवस्थारूपः प्रतिषेधश्चेति। तत्राभ्यनुज्ञारूपप्रतिषेधविधिव्यतिक्रमे न प्रत्यवायो नापि निषिद्धाचरणावगानप्रसक्तिरिति मन्यन्ते महानुभावाः॥ अवश्यं हि परेण कारयितव्यतयेष्यमाणमपि किञ्चित्कर्म कर्तुमनादिष्ट एव व्यवस्यमानः कश्चित्-

सुयोग्यबालकादिरशक्तत्वबुद्धया वा प्रतिष्ठितत्वबुद्धया वा आदरबुद्धया वा प्रेमतो वा केनचिद्विशिष्टानुरोधेन वा किञ्चिद्दोषानुषङ्गशङ्कया वा पित्रादिगुरुजनवार्य्यमाणोऽपि यद्युत्साहभरेण स्वस्मिन् शक्तिं योग्यतामौचित्यं वा दर्शयन् दोषसंसर्गमनासाद्यैव तत् कर्म्म यथावत् साधयेत् न स तर्हि गुरुजनाज्ञाभङ्गकारित्वेनावगीयते, प्रत्युत निषेधकेनापि गुरुजनेनान्यैश्च विशिष्टैरसौ भूयसाऽभिनन्द्यत इति दृश्यते लोके। एवमेवेहापि—"शास्त्रं हि वत्सलतरं मातापितृसहस्रतः" इत्यार्षप्रामाण्यात् परमानुग्राहकेण शास्त्रेण क्वचिदशक्यत्वादिबुद्धया यदि किञ्चिन्निषेध्यते न तत्र शक्तस्य तद्व्यतिक्रमे कश्चिद्दोषो निरूप्यते। अत एव मीमांसाबालप्रकाशे—

"अभ्यनुज्ञारूपः प्रतिषेधो यथा—एष पन्था एतत्कर्म्मेत्यैतरेयेऽपि द्वितीयारण्यके—तस्मात् काल एव दद्यात् काले न दद्यादिति। अत्र काले दादिद्र्द्राद्यवस्थारूपे न दद्यादिति न दाने दोषः प्रतिपाद्यते। नहि भोजनमात्रपर्य्याप्तवतोऽप्यतिथ्याद्यागमने तस्मै तद्दत्वा स्वयमनशनं कुर्वतोऽपि दोषो युज्यते। तथात्वे "सक्तुप्रस्थस्य वो विप्रा न यज्ञः सदृशो मतः"—इत्याद्युपाख्यानविरोधात्। तस्मात् काले न दद्यादित्यभ्यनुज्ञैव। तत्राददत ईषद्दोष इति"—इत्येवमभ्यनुज्ञाप्रतिषेधः श्रौतोदाहरणेन समर्थितः। एवमेवै-

तस्यापि समुद्रसंयानादिकतिपयप्रतिषेधस्य कलौ सामान्यभावेनाशक्यत्वबुद्ध्या प्रवर्तमानस्याभ्यनुज्ञारूपत्वावसायान्न विशिष्टोत्साहवद्भिर्धर्म्मसंरक्षणसमर्थैस्तद्व्यतिक्रमे क्रियमाणे कश्चिद्दोषः प्रसज्जते। सिद्धान्तितश्चायमर्थः कलिवर्ज्यंप्रकरणे पराशरमाधवीये—"निषेधाश्च युगप्रयुक्तानुपपत्तिमूलकाः। अन्यथा विध्युत्पत्तिवैयर्थ्यात्। अनुपपत्तिश्च दृष्टादृष्टा चेति द्विविधा। तत्र दृष्टानुपपत्तिमूलकानामननुष्ठानमनुष्ठानश्चानिन्दितम्। यत्रानन्यथासिद्धप्रतिप्रसवविधिरुन्नीयते तत्र दृष्टानुपपत्तिः कल्प्यते। दूराध्वोपगतं श्रान्तमित्यादिकम्। "राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः" इत्यादि चोक्त्वा—"शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम्,,—"यजेत वाश्वमेधेन"—इत्याद्यनुपपत्त्या दूरयात्रादिविधिरुन्नेय इति।

युक्तं चैतत्। अन्यथा हेमाद्रावादित्यपुराणे—

विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम्।<br>
बालायाः क्षतयोन्यास्तु वरेणान्येन संस्कृतिः॥ १॥<br>
कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः।<br>
आततायिद्विजाप्याणां धर्म्मयुद्धेन हिंसनम्॥ २॥<br>
द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः।<br>
सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम्॥ ३॥

महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च सग्रहः ॥ ४ ॥
अग्निहोत्रहवन्याश्च लेहो लीढापरिग्रहः ।
कृतस्वाध्यायसापेक्षमघसंकोचनं तथा ॥ ५ ॥
प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ।
संसर्गदोषा स्तेयान्यमहापातकनिष्कृतिः ॥ ६ ॥
वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ।
दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ॥ ७ ॥
सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ।
अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः ॥ ८ ॥
परोद्देशात्मसंत्याग उद्दिष्टस्यापि वर्जनम् ।
प्रतिमाभ्यर्चनार्थाय संकल्पश्च सधर्म्मकः ॥ ९ ॥
अस्थिसंचयनादूर्ध्वमङ्गस्पर्शनमेव च ।
शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥ १० ॥
षड्भक्तानशने चान्नहरणं हीनकर्म्मणः ॥

माधवीये पृथ्वीचन्द्रोदये च —

शूद्रेषु दासगोपालकुलामित्रार्द्धसीरिणाम् ।
भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः ॥ १ ॥

शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशीलता ।
आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा ॥ २ ॥
प्रजार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः ।
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ॥ ३ ॥
बलात्कारादिदुष्टास्त्रीसङ्ग्रहो विधिनोदितः ।
यतेश्च सर्ववर्णेषु भिक्षाचर्य्या विधानतः ॥ ४ ॥
नवोदके दशाहे च दक्षिणा गुरुणोदिता ।
ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च ॥ ५ ॥
भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ।
गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ॥ ६ ॥
पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् ।
यतेः सायंगृहत्वं च सूरिभिस्तत्त्वदर्शिभिः ॥ ७ ॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्वकं द्विजैः ॥ ८ ॥

हेमाद्रौ माधवीये च ब्राह्मे—

गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा ।
नराश्वमेधौ मद्यश्च कलौ वर्ज्यं द्विजातिभिः ॥ १ ॥

हेमाद्रौ पुराणे—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥ १ ॥

निगमे—

अग्निहोत्रं गवालम्भं संन्यासं पलपैतृकम् ।
देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥

गवार्थे ब्राह्मणार्थे च प्राणत्यागः कलौ न हि ।
द्विजानां गोपशूद्रादौ भोज्यान्नत्वं कलौ न हि ॥ १ ॥
शिष्यस्य गुरुपत्नीषु न चिरं वासशीलता ।
आपदि क्षत्रवैश्याश्च वृत्तिं विप्रः कलौ त्यजेत् ॥ २ ॥
नवोदकनिषेधश्च दक्षिणां गुरुवाञ्छिताम् ।
वृद्धरुग्णादिमरणं जलाग्निपतनादिभिः ॥ १ ॥
गोतृप्तिमात्रे भूयिष्ठे पयस्याचमनक्रियाम् ।
पितृवादे साक्षिदण्डं कलौ पञ्च विवर्जयेत् ॥ २ ॥
द्वादशाब्दं गुरौ वासं मुखाग्निधमनक्रियाम् ।
यतेर्भिक्षां सर्ववर्णे कलौ त्रीणि विवर्जयेत् ॥ १ ॥
घृतदुग्धादिभिः पक्वमन्नं शूद्रात् कलौ त्यजेत् ।

भिक्षामटन् यती रात्रौ न वसेद् गृहिणां गृहे ।
विधूमसन्नमुसले काले भिक्षां कलौ त्यजेत् ॥ २ ॥

चत्वार्य्यब्दसहस्राणि चत्वार्य्यब्दशतानि च ।
कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः ॥ १ ॥
संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ।

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
संन्यासमग्निहोत्रञ्च तावत्कुर्य्यात् कलौ युगे ॥ १ ॥

इत्येवमादीनामन्येषां च बहूनां दाक्षिणात्यग्रन्थेषु तत्र तत्रोपात्तानां कलिवर्ज्यानामविशेषेण प्रतिषेध्यत्वाभ्युपगमे तत्रत्यकतिपयप्रतिषिद्धधर्म्माचरणकर्तृणामिदानीन्तनानां भूयसां शिष्टानामपि प्रतिषिद्धाचरणकर्तृत्वेन प्रत्यवायप्रसङ्गो दुर्वारः स्यात् । न च तथानुमोदन्ते शिष्टाः । को हि नामातिदूरतस्तीर्थसेवां कुर्वाणः पातित्येनाभियोज्यते । द्विजाग्र्याणां चापद्वृत्त्या राजसेवां कृषिं पशुपालनादिवैश्यवृत्तिं चाश्रितवतां को नाम प्रत्यवायसम्बन्धमुपपादयेत् । प्रवासित्वं चानुसरतां ब्राह्मणानां प्रवासग्रहणदोषात् पातित्यसम्बन्धं कः समर्थयेत् । तस्मान्नायमेकान्तात्यन्तप्रतिषेधः । किन्तु दूरदेशगमने स्वधर्म्महानिशङ्का प्राणान्तिकक्लेशानुबन्धशङ्का च तत्प्रतिषेधे बीजं स्यात् ।

नाकारणो हि शास्त्रेऽस्ति धर्म्मः सूक्ष्मोऽपि जाजले ।
कारणाद्धर्म्ममन्विच्छन् स लोकानाप्नुते शुभान् ॥ १ ॥

आर्षं धर्म्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः ॥ २ ॥

इत्यादिमहर्षिवाक्यैः सर्वेषामेव धर्म्माणां सोपपत्तिकत्वावगमात् । तथा च यः स्वधर्म्महानिमजनयित्वा क्लेशविशेषं चानासाद्य यदि दूरतोऽपि तीर्थसेवामङ्गीकुर्य्यात प्रवासित्वं वा गृह्णीयात—न स निषेधोल्लंघनप्रयुक्तेन दोषेणाभियुक्तःस्यात् । एवमेव कलौ दरिद्रभूयस्त्वादशक्तानां समुद्रगमनं न शक्यं कर्तुम् । विधर्म्मिसाहित्येनैकाकिनो गमने च धर्म्महानिशङ्काऽस्तीत्यतः परमानुग्राहकेण शास्त्रेण समुद्रयानविषयकोऽभ्यनुज्ञारूपः प्रतिषेधो विधीयते । तथा च यथा—"काले न दद्या" दिति वैदिकाभ्यनुज्ञारूपप्रतिषेधे सत्यपि सर्वथा ददन्नैनसा युज्यते । एवमेव समुद्रयात्रास्वीकारं न कुर्य्यादिति पौराणिकाभ्यनुज्ञारूपप्रतिषेधे सत्यपि स्वधर्म्मं परिरक्षितुं समर्थैर्बहुभिः स्वसमानधर्म्मिभिः संभूय गच्छद्भिः क्रियमाणायां समुद्रयात्रायां न स्वल्पेनापि शक्यः पातित्ययोगोऽभिसन्धातुम् । उपपत्त्या तस्य शास्त्रस्यासमर्थदीनैकाकिसाधारणमनुष्यपरत्वाभ्युपगमात् । अतश्च बहु-

भिरुपायैः स्वधर्मसंरक्षणसमर्थानां महाराजानां तत्साहित्येन गच्छतामन्येषां च त्रैवर्णिकानां समुद्रयाने नास्ति दोषावकाश इत्याहुः। एवं च समुद्रयात्रास्वीकार इति निषेधस्य येऽपि धर्म्मयात्राङ्गसमुद्रयात्रामात्रपरत्वं नाभ्युपगच्छन्ति तैरपीदानीं महाराजानां सानुगानां समुद्रयात्रायां दोषो नास्तीति विज्ञाय सन्तोष्टव्यम् ॥ १ ॥

## इति समुद्रयात्रायाः कलिवर्ज्यताखण्डने द्वितीयः प्रकारः ॥ २ ॥

अथान्यथा समीक्षमाणा अन्ये विचक्षणा इत्थमाचक्षते स्वतन्त्रप्रज्ञाः। "समुद्रयात्रास्वीकारः कलौ वर्ज्यः—द्विजस्याब्धौ तु नौयातुः शोधितस्यापिसंग्रहः"—इत्येतदेकमेकं वचनमेकैकस्मिन्नुपपुराणे क्वचिदुपलभ्यते। उपपुराणानां च तावत्पुराणापेक्षयाऽवरकक्षाकाणां कियदस्ति प्रामाण्यमिति नाविदितं विदुषाम्। यतश्चोपपुराणेष्वप्यन्येषु न क्वाप्युपलभ्यते तत्संवादि वचनं तर्हि कैव कथा तेषां पुराणानामष्टादशानाम्। अथैषां पुराणानामपि सृष्ट्याद्यर्थपञ्चके सर्वथा प्रमाणभूतानां सृष्टिप्रतिसृष्टिमन्वन्तरवंशवंश्यानुचरितातिरिक्तेषु कल्पशुद्ध्याद्यर्थेषु कल्पानुवादरूपत्वात् कल्पप्रामाण्यादेव प्रामाण्यं वाच्यम्। न च ते धर्मसूत्रकारा मन्वादयः केऽपि कुत्रापि कल्पे समुद्रयात्रायाः कलिवर्ज्यत्वमाचक्षते। तथा च धर्मसूत्रकारैरस्मरणान्मूलस्मृत्यभावान्निर्मूलेयमुपपुराणस्मृतिरिति गम्यते।

ननु तादृशपुराणवचनानुरोधेन तदर्थे तात्पर्यग्राहिका काचिन्मूलस्मृतिरनुमास्यते इति चेत् सत्यम्। स्मृतीनामपि हि नैकान्ततः सर्वत्र प्रामाण्यमेवाभ्युपगच्छन्ति प्रामाण्यविदः। तासां परतःप्रमाणतया स्वतःप्रमाणमूलश्रुत्युनुमापकत्वे सत्येव श्रुतिप्रामाण्यात् तत्प्रामाण्यस्याभ्युपगन्तव्यतया यत्र नानुमापकत्वं तत्र तत्प्रामाण्याभावस्य—"विरोधे

त्वनपेक्षं स्यादसति ह्यनुमानम्—हेतुदर्शनाच्च" इति शास्त्राभ्यां सिद्धान्तितत्वात्। तथा च प्रकृते समुद्रयानं न कुर्य्यादित्यस्याः स्मृतेरपि भुज्युवसिष्ठाद्युपाख्यानात्मकवैदिकलिङ्गप्रक्लृप्तया समुद्रयानं कुर्य्यादित्यनया श्रुत्या "अजितं जेतुमनुचिन्तयेन्न क्वचिदप्यलं बुद्धिमादध्यादि" ति सामश्रुत्यनुमोदितया विरुद्धत्वान्मूलश्रुत्यनुमापकत्वासंभवाच्च न प्रामाण्यमुपपद्यते। न च समुद्रयानं कलौ न कार्य्यमित्यर्थस्य पुराकालिकभुज्युवसिष्ठादिसमुद्रयात्राविषयकोपाख्यानविरोधित्वासंभवाच्छक्यमनया स्मृत्या समुद्रयानप्रतिषेधश्रुतिः कल्पयितुमिति वाच्यम्। तादृशश्रौतोपाख्यानसिद्धस्य समुद्रयानं कुर्य्यादिति विधेः कल्यादिकालसम्बन्धमनपेक्ष्यैव प्रथमोपस्थितत्वात् तेनावरुद्धतया प्रतिषेधपरमूलश्रुत्यनुमानस्य कालात्ययोपदिष्टत्वात्। स्मृत्यनुमितश्रुत्यपेक्षया च श्रौतोपाख्यानानुमितश्रुतेरन्तरङ्गत्वात् प्रथमोपस्थितत्वं निर्बाधमुपपद्यते। तस्मादौदुम्बरी सर्वा वेष्टयितव्येति स्मृतिवदियमपि समुद्रयात्रानिषेधस्मृतिर्विप्रलम्भकवाक्यवन्निर्मूला--इति सिद्धम्।

इदमप्यत्र बोध्यम्—"आपद्वृत्तिर्द्विजाग्र्याणां तीर्थसेवातिदूरतः। ब्राह्मणानां प्रवासित्वम्"-इत्यादि स्मृतिवदस्याः-समुद्रयाननिषेधस्मृतेरपि दृष्टार्थमूलकत्वं तावत् सप्रपञ्चमुपपादितं प्राक्। तथा च हेतुदर्शनाच्चेति सूत्रस्थ--दृष्टमूलस्मृ-

त्यप्रामाण्याधिकरणन्यायेनैतयाऽप्यन्यथासंभवदुपपत्तिकया निषेधस्मृत्या सत्यतिबाधाभावे मूलश्रुतेः कल्पयितुमशक्यत्वाद्—वैसर्जनहोमीयं वासोऽध्वर्य्युर्गृह्णातीति स्मृतिवदस्या अपि निषेधस्मृतेर्नास्ति प्रामाण्यमिति संसिद्धम्। अप्रामाण्यं चादृष्टविशेषानुत्पादकक्रियाबोधकत्वम्। कलौ न कुर्यादित्येतद्वाक्यघटककलिङर्थघटकीभूतानिष्टस्य समुद्रयात्रोपयुक्तद्रव्यादिसामग्रीसंघटनवैकल्यप्रयुक्तलौकिकानुपपत्तिक्लेशरूपतया नरकोत्पत्तिप्रयोजकादृष्टरूपत्वाभावेन धर्म्मांशे तत्प्रामाण्यनिराकरणात्। तस्मान्नैतस्याः स्मृतेरदृष्टोत्पादकत्वे तात्पर्य्यमित्यलम्।

## इति समुद्रयात्रायाः कलिवर्ज्यताखण्डने तृतीयः प्रकारः ३

## इति कलिवर्ज्यत्वप्रकरणं परीक्षितम्।

अथ यदेतस्याः समुद्रयात्रायाः पातित्यप्रयोजकत्वा-भिप्रेणात्र वनान्तराण्युपन्यस्तानि —

समुद्रयायी बन्दी च तैलिकः कूटकारकः ।
एतान् विगर्हिताचारानुभयत्र विवर्जयेत् ॥ १ ॥
समुद्रयायी कृतहा रथ्यासमयभेदकः ।
द्विजनिन्दारतश्चैव ते वर्ज्याः श्राद्धकर्म्मसु ॥ २ ॥
श्रुतिविक्रयिणो ये च परपूर्वाः समुद्रगाः ।
असमानान् याजयन्ति पतितास्ते प्रकीर्तिताः ॥ ३॥ इति ।

तत्रापीदं विकल्प्यते । किमेतेभ्यः सर्वविधयात्रायाः प्रतिषेधो विवक्ष्यते उत कस्याश्चित् । तत्र नाद्यः पक्षः शक्यतेऽध्यवसातुम् । वसिष्ठादिसमुद्रयात्राविषयकवैदिकलिङ्गस्य पाण्डवादिकालिदासादिसमुद्रयात्राविषयकैतिहासिकलिङ्गस्य च विरोधात् । पातित्यविशेषोत्पत्तौ यथाकथञ्चिदपि सिद्धस्य समुद्रयानस्य निमित्तत्वाभ्युपगमे द्वारकादितीर्थयातॄणामपि पातित्यसम्बन्धापत्तेश्च । न चैतेषां पातित्यप्रायश्चित्तयोः कुत्रापि चर्चोपलभ्यते । तस्मात् स्मार्त्तश्रुतिवैदिकलिङ्गाभ्यां विकल्पकल्पनापेक्षया वैदिकादिलिङ्गानुगतप्रकारातिरिक्तप्रकारकत्वेन संकोच्य स्मार्तवचनोद्दिष्टसमुद्रयात्राया व्यवस्थानस्यैवौचित्यमतो न सर्वविधयात्राप्रतिषेधकत्वमेषामुपपद्यते ।

स च संकोचस्तावद्विशिष्य केन रूपेणेत्यपेक्षायां कलिविषयकत्वेनेवेति कश्चिदभ्युपगच्छेत् तन्नादर्त्तव्यम् । तदंशे तात्पर्य्यग्राहकयुक्त्यलाभात् न च पौराणिकवचनैक-वाक्यतानुरोधेन तदभ्युपगमस्यत इति वाच्यम् । समुद्र-यात्राकर्तुः कलिकालावच्छेदेन संग्रहप्रतिषेधबोधकाभ्यां पौराणिकवचनाभ्यां समुद्रयात्राप्रतिषेधविधायकानामेषां स्मार्त्तवचनानां विभिन्नविषयतया तदेकवाक्यताभिमानेनात्र समुद्रयात्रायाः कलियुगाधिकरणकप्रतिषेधविषयत्वस्य कल्पयितु-मशक्यत्वात् । मन्वादिवचनानामेवं कलिपरत्वे—"कृते तु मानवा धर्म्माः"—इति पराशरस्मृतिविरोधाच्च । सर्वयुग-साधारण्येनाभिप्रेतैरगारदाहगरदानादिभिः सह पठिते समुद्र-याने तथा संकोचस्यानवसरदुःस्थत्वाच्च । संकोचेऽपि वा कालिदासजयापीडादीनां मतान्तरे पाण्डवानाञ्च कलावेव कृतसमुद्रसंयानानामेनोऽभियुक्तेरद्याप्यनिराकरणाच्च । तस्मान्न मन्वादिस्मृतिघटकसमुद्रयाय्यादिपदैरद्ययुगीया एव समुद्रगन्तारो विषयीक्रियन्ते, अपि तु सर्वयुगीया इति न कलि-विषयकत्वेन तत्र संकोचः शक्यः कर्तुमिति सिद्धम् । एवं स्थिते कथमत्र संकोचः ।

कर्तव्य इत्यपेक्षायां विचक्षणाः पश्यन्ति ।

समुद्रयायि-समुद्रग-पदस्वारस्यादेवैषां स्मार्त्तवचनानां

जीविकाङ्गभूतसमुद्रयात्रामात्रपरत्वमवसीयत इति तथा हि तावदभियुक्तावदन्ति । समुद्रशब्दस्य जातिवचनत्वाभावात् तच्छील प्रत्ययान्तः समुद्रयायिशब्द इति । ताच्छील्यञ्च साक्षात् क्रियासमभिहारः अथवा "बहुलमाभीक्ष्ण्ये" इति णिनिप्रत्ययो द्रष्टव्यः । आभीक्ष्ण्यञ्च पौनःपुन्यम् । तथा चोभयथापि सातत्येन जीविकार्थमभ्यासमुद्रसंयानानामेवाय-मभिधायकः शब्दः प्रतिपद्यते । ये तु महान्तः "करणे यजः" इति सूत्रे यजतेर्धात्वन्तरोपलक्षकत्वं कथञ्चिदुपकल्प्य शास्त्र-विरुद्धमताच्छील्ये णिनिमभ्युपगम्य समुद्रं यातवानित्यर्थम-भिप्रयन्ति ते दुराग्रहेण समुद्रयात्रायां मिथ्यादोषमारोपयितु-मुग्रभूताः कुशकाशावलम्बमात्रेण वृथा क्लिश्यन्तोऽनर्थं कल्पयन्तश्च शब्दाचार्य्याणां विस्मरणदोषं प्रागल्भ्येनोद्भा-वयन्तश्च सर्वथा प्रणम्या एव । वस्तुतस्तु समुद्रयायिशब्दो भूयस्त्वं विषयीकृत्यैव प्रवर्तते न तु कदाचिदेकदा केनापि निमित्तेन समुद्रं गत्वा प्रत्यावृत्ते समुद्रयायिसमुद्रगाम्यादि-शब्दान् व्युत्पन्नाः प्रयुञ्जते । एवं समुद्रगशब्दोऽपि नतर कदाचिदेकवारं कार्य्यान्तरेण समुद्रं गत्वा प्रत्यावृत्तमभि-धत्ते समुद्रगसमुद्रगतादिशब्दानां समुद्रप्रत्यासत्तिं विषयीकृ-त्यैव प्रवर्तनात् सा च प्रत्यासत्तिः प्रत्युत्पन्नावस्थानलक्षणा चिरावस्थानलक्षणा चेति द्वेधा । समुद्रं गतः पुरुषो यावता कालेन समुद्रान्न विश्लिष्यते तावत्काले समुद्रगशब्दव्यपदे-

अत एव महाभारते दानधर्म्मेषु श्राद्धवर्ज्यविप्राधिकारे—

कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्धुषिको गायकः सर्वविक्रयी ॥ १ ॥

सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च शिल्पं यश्चोपजीवति ॥ २ ॥

कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
ईदृशा ब्राह्मणा ज्ञेया अपाङ्क्तेया युधिष्ठिर ! ॥ ३ ॥

इत्येवं समुद्रयाय्यादिपदसामानाधिकरण्येन सामुद्रिक पदं प्रयुक्तं दृश्यते । समुद्रगमनशीलः समुद्रे नियुक्तश्च सामुद्रिकः । शीलमिति वा तत्र नियुक्त इति वा ठक्को विधानात् । तस्माद्वचनान्तरसंप्रतिपत्त्यापि समुद्रयाय्यादिपदस्य समुद्रयानवृत्तिकेष्वेव तात्पर्य्यमवसीयते । युक्तश्चैतत् "अन्यथा स्रोतसां भेदको यश्च तेषां चावरणे रतः । गृहसंवेशको दूतो वृक्षारोपक एव च" ( मनुः ३।१६३ ) इत्येवं मनुस्मृतौ श्राद्धवर्ज्यप्रकरणे प्रतिषेधमात्रेण यः कदाचिदेकवारं कथंचिदपि कस्यचिद्दौत्यं कुर्य्याद्, वृक्षं वा रोपयेत्, स्रोतो वा वा किञ्चिद्भिन्द्यात्, सोऽपि मन्ये पतितः स्यात् लोके च भूयसा चैवं कुर्वाणा दृश्यन्ते न त्वेव ते पातित्येनाभियोज्य-

शसमानकालिकसमुद्रावस्थानयोगादवकल्पते तत्र समुद्रगश-ब्दव्यपदेशः। अथ यस्य जीविकासम्बन्धाद्बलवद्राजादेश-वशाद् निमित्तान्तरसंयोगाद्वा समुद्रे चिरायात्रस्थितिर्निय-मिता स्यात्तस्य तन्नियोगसमयमनतिक्रामतो मध्ये देशान्त-रोपसत्तावपि समुद्रगत्वव्यपदेशो न विहन्यते। कस्मैचित्का-लायान्यत्रोपस्थितस्यापि जीविकादिसूत्रेण समुद्रवर्त्तित्वान-पायात्। अत एव यश्चिराय राजसमीपमधिकारावेशेन गच्छ-ति सोऽन्यत्र वर्तमानोऽपि राजसमीपगोऽय मितिलोके व्य-पदिश्यते। यस्तु यदाचिदेव दा कथञ्चिदुपासन्नो राजसमी-पम् स तदानीं राजसमीपगोऽयमितीत्थं व्यपदिश्यमानोऽपि ततोऽन्यत्र गतो न तथा व्यपदिश्यते। नापि कदाचिन्मार्गे कथञ्चिद्राजसान्निध्यमासाद्य क्रमशो दूरदेशमुपगतः शक्यते राजसमीपग इति व्यपदेष्टुम्। स्वतः सूत्रतो वा प्रत्यासत्ते-रभावात्। एवमेतत्तुल्यन्यायात् कार्य्यान्तरेण देशान्तरं ग-च्छन् मार्गे कथंचित् समुद्रं गत्वाऽपि ततः प्रत्यावर्त्य दूरदे-शमुपतिष्ठमानः कश्चिन्न शक्यते समुद्रग इति व्यपदेष्टुम्। ग्रामादागते ग्रामाद्विश्लिष्टे ग्रामगोऽयमित्यादिव्यपदेशस्य व्युत्पत्तिविरुद्धत्वात्। तस्माद् वृत्तिप्राधानावेवैतौ समुद्रयायि-समुद्रगशब्दौ न त्वेवैकहेलया समुद्रगन्तृमात्रं विषयीकृत्य प्रवर्तेत इति सिद्धम्।

न्ते। तस्माद्य एवैवंवृत्तिकाः स्युस्त एवात्र वचनेऽभिप्रेता इति गम्यते। तत्सामान्यादिहापि तथैवार्थो लभ्यत इति युक्तम्। अत एव येऽप्यन्ये सामान्यशब्दा गरद-कुतहादयः केचिदिह श्राद्धवर्ज्यब्राह्मणप्रदर्शनवाक्ये समुपात्तास्तेष्वपीमं क्रियासमभिहारं विषयीकृत्यैवार्थः समुन्नीयत इति विशिष्टाः पश्यन्ति। गरदानादिवृत्तिप्रधानेष्वेव गरदादिशब्दस्वारस्यात्। अत एव बृहस्पत्यादिप्रोक्तेषु श्राद्धवर्ज्यब्राह्मणप्रदर्शनवाक्येषु स्पष्टमेव श्रूयते सर्वशेषतया सदाशब्दः।

गान्धर्वो लोहकारश्च सौनिकस्तन्तुवायकः।
चक्रोपजीवी रजकः कितवस्तरलस्तथा ॥ १ ॥

यजमानोपजीवी च शूद्राध्यापकयाजकौ।
कुलटश्चित्रकर्म्मा च वार्धुषिश्चर्म्मविक्रयी ॥ २ ॥

समर्घं पण्यमाहृत्य महार्घं यः प्रयच्छति।
स वै वार्धुषिको नाम यश्च वृद्ध्योपयोजयेत् ॥ ३ ॥

वृथारामाश्रमाणां च भेदकः पुण्यविक्रयी।
विक्रयी ब्रह्मणो यश्च योनिसाङ्करिकश्च यः ॥ ४ ॥

रङ्गोपजीवी कूटाशः कुहको गुरुगुप्तिकः।
भिषक् च रञ्जकश्चैव रूपाजीवी च सूचकः ॥५ ॥

सौनिको वणिकश्चैव निषादेन समाः स्मृताः ।

कर्मणा तेषु यो मोहाद् ब्राह्मणो वर्तते सदा ।

प्रायश्चित्ते तु चरिते परिहार्य्यो भवेद् बहिः ॥ ६ ॥

एते ब्राह्मणचण्डालाः सर्वे ब्रह्महणः किल ।

तस्माद् दैवे च पित्र्ये च वर्जितास्तत्त्वदर्शिभिः ॥७॥इति

तस्माद् य एव केचिदेवमेवं वृत्तिप्रधानाः स्युस्त एव नूनं श्राद्धे वर्ज्यतया दृश्यन्त इति न कदाचिदेकवारं द्विवारं वा निमित्तान्तरप्रसङ्गात् कथञ्चिदुपगतः समुद्रमेतद्वचनघटक समुद्रयायिपदप्रयोज्यतात्पर्य्यीयविषयताभाग्भवितुमर्हति । तस्माज्जीविकाङ्गभूतायाः समुद्रयात्रायाः क्रियासमभिहारेण संसिद्धकर्तव्यताया एवायं मन्वादिवचनैः श्राद्धाङ्गतया निषेधो न तु कार्य्यान्तरप्रसङ्गागतकर्तव्यतायाः कदाचिदुपस्थितायाः कस्याश्चन समुद्रयात्राया इति सिद्धम् ।

## इति समुद्रयायिनः श्राद्धवर्ज्यता-खण्डने प्रथमः प्रकारः ।

अथवा तुष्यतुदुर्जनन्यायेनेदमुक्तम् । वस्तुतस्तु नेदं मनुमरीचिवचनं जीविकाङ्गभूताया अपि समुद्रयात्रायाः प्रतिषेधाय समर्थ्यते । अस्य शास्त्रस्य श्राद्धकर्तारं पुरुषं प्रति प्रवर्तमानतया तद्व्यतिक्रमे श्राद्धकर्तुरवगानेऽपि समद्रगन्तरि दोषोत्पत्तेर्वक्तुमशक्यत्वात् । अनेन हि समद्रगन्तुः श्राद्धे पात्रत्वेन भोज्यत्वेन वा ग्रहणं निषिध्यते न तु समुद्राय जिगमिषुं पुरुषं प्रत्यपि समुद्रगमनप्रतिषेधाय इदं प्रवर्त्तते । —अथवा ज्योतिष्टोमे दीक्षितस्य ब्राह्मणस्य पयोव्रतवच्छ्राद्धे पात्रभूतस्य भोज्यभूतस्य वा ब्राह्मणस्य संस्कारभूतं समुद्रायानं क्रत्वर्थं स्यात् । पयोव्रतादीनां क्रतुधर्म्मताधिकरणे "द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्म्मः स्याद्"—इत्यादिसूत्रेण तथैव व्यवस्थापनात् । तथा च समुद्रगन्तुः पात्रत्वादिना ग्रहणे केवलं श्राद्धवैगुण्यं प्राप्नोति न तु गृह्यमाणो ब्राह्मणस्तात्रता प्रत्यवायभाग् भवितुमर्हति । न च क्रत्वर्थत्वेऽपि —स्मृत्याचारनिषेधार्थवादमन्त्रप्रायश्चित्तदण्डैः कल्प्यमानतया कल्प्यप्रतिषेधविधेः सप्तधा विधितन्त्रे व्यवस्थापनादिह समुद्यायिनिषेधविधिना कल्प्यः समुद्यानप्रतिषेधविधिर्लभ्यते तस्य चावगोरणमलवद्वासः संवादनिषेधादिपुमर्थताधिकरणन्यायेन श्राद्धप्रकरणस्थस्यापि पुरुषार्थत्वं भविष्यतीति वाच्यम् । श्राद्धं प्रति समुद्रद्यायिग्रहणप्रतिषेधे श्राद्धवैगुण्यजनकतायाः समुद्रयाननिष्ठायाः प्रयोजकत्वोपपत्तावपि समुद्रयायिपुरुषधर्म्मिकप्रत्यवायजनकतायाः

समुद्रयाननिष्ठायाः प्रयोजकत्वासंभवात् तेन तत्कल्पयितुमशक्यत्वात् । न च यतः समुद्रगन्ता श्राद्धे वर्जितः तस्मात् समुद्रं न गच्छेदिति विधिः कल्प्यः स्यात्, समुद्रगमनप्रयुक्ताया एव समुद्रगन्तुः श्राद्धे वर्ज्यताया उपपाद्यत्वादिति वाच्यम् ।

तादृशविधिकल्पनस्याप्रामाणिकत्वात्, श्राद्धादियत्किञ्चित्कर्मवैगुण्यजनकताविशिष्टानां श्राद्धाद्यवच्छेदेन संग्रहप्रतिषेधौचित्येऽपिसर्वथा तत्संग्रहप्रतिषेधस्य युक्तिविरुद्धत्वाल्लोकविरुद्धत्वाच्च । अन्यथा संन्यस्तादिलिङ्गी रक्तवासाश्च श्राद्धे वर्जितस्तस्मात् संन्यासं रक्तवासश्च न धारयेदित्यपि विधिः कल्प्यः स्यात् ।

न श्राद्धे भोजयेन्मित्रं धनैः कार्य्योऽस्य संग्रहः ।
नारिं न मित्रं यं विद्यात् तं श्राद्धे भोजयेत् द्विजम् ॥१॥
यस्य मित्रप्रधानानि कव्यानि च हवींषि च ।
तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च ॥ २ ॥

इत्येवं छन्दोगपरिशिष्टे मित्रस्य श्राद्धवर्ज्यत्वं विधीयते । ततश्च मैत्र्यं न कुर्य्यादित्यपि विधिः कल्प्यः स्यात् । तुल्यन्यायात् एवम्—

चिकित्सकान् देवलकान्मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥ १ ॥

भृतकाध्यापको यश्च भृतकाध्यापितश्च यः ।
शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥ २ ॥

अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी बन्दी च तैलिकः कूटकारकः ॥ ३ ॥

हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ।
पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ ४ ॥

कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च ।
प्रेतनिर्य्यातकश्चैव वर्जनीयाः प्रयत्नतः ॥ ५ ॥

इत्येवमादयो मानवे ।

कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्धुषिको गायकः सर्वविक्रयी ॥ १ ॥

सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च शिल्पं यश्चोपजीवति ॥ २ ॥

कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
ईदृशा ब्राह्मणा ज्ञेया अपाङ्क्तेया युधिष्ठिर । इति भारते ॥

वैडालव्रत–दुर्वृत्त–दम्भि–देवलकादयः ।

कृतघ्ना नास्तिकाश्चैव म्लेच्छदेशनिवासिनः ॥ १ ॥

त्रिशङ्कुवर्वरौड्रान्ध्रटङ्कद्रविडकोङ्कणाः ।

कर्णाटाश्च कलिङ्गाश्च चीनाः श्राद्धेषु निन्दिताः ॥२॥

इति श्राद्धक्रियाकौमुद्यां मात्स्ये ।

त्रिशङ्कून्वर्वरानन्ध्रान् चीनद्रविडकोङ्कणान् ।

कर्णाटकांस्तथाभीरान् कलिङ्गांश्च विवर्जयेत् इति हेमाद्रौ मात्स्ये ।

अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रान् गुर्जरांस्तथा ।

आभीरान् कोङ्कणांश्चैव द्राविडान् दाक्षिणायनान् ।

आवन्त्यान् मागधांश्चैव ब्राह्मणांस्तु विवर्जयेत् । इति

हेमाद्रौ सौरपुराणे।

यत्र मातुलजोद्वाहो यत्र वा वृषलीपतिः ।

श्राद्धं न गच्छेत्तद्विप्राः कृतं यच्च निरामिषम् । इति

श्राद्धदीपकलिकायां जातूकर्ण्यः

ऋतुकाले नियुक्तो वा नैव गच्छेत् स्त्रियं क्वचित् ।

इति वृद्धमनुः ॥

एवमेतेषामन्येषां च निर्णयसिन्ध्वादिकतिपयनिबन्धो-
ल्लिखितानां श्राद्धवर्ज्यानां श्राद्धनिषेधमात्रेणैव सर्वदा निषेध-

कल्पनायां महती विशृङ्खला लोके धर्म्मसंकटायापद्येत । तस्माच्छ्राद्धे निषेधदर्शनात् सर्वथा तन्निषेधकल्पनमशास्त्रार्थ इति भावयन्तु शास्त्रतत्त्वं धर्ममर्मग्राहिणो विद्वांसः

अथवा सन्तुष्यतु भवान् । कल्प्यतां स प्रतिषेधविधि : । तावताप्यभीष्टसिद्धिः । श्राद्धसंयुक्तो हि समुद्रगन्ता पुरुषः श्राद्धं विगुणयेत् नत्वसंयुक्तोऽपि ! संयोगश्च न ब्राह्मणानां पात्रत्वेन नित्यः किन्तु संप्रतिपत्तिसाध्यः । ततश्च श्राद्धपात्रं बुभूषुः समुद्रं न गच्छेदित्येवं काम्यः प्रतिषेधः कल्प्यः स्यान्न च काम्यव्यतिक्रमे पुरुषः प्रत्यवैतीति समुद्रयातुरनेन दोषासिद्धिः । न च "समुद्रयानगमनं ब्राह्मणस्य न शस्यते अथ पतनीयानि; समुद्रसंयानम्" इत्यादिवृद्धपराशरबौधायनवचनाभ्यां संभवेद् यदि मोहेन पुनः संस्कारमर्हतीत्यादि शुद्धि विधायकवाक्यशेषेण पुरुष प्रत्येव प्रवर्तमानेन पुमर्थतया निर्णीतार्थाभ्यामेकवाक्यतानुरोधादस्यापि निषेधविधिकल्प्यप्रतिषेधविधेः समुद्रं न गच्छेदित्यतावन्मात्रस्वरूपस्यपुरुषार्थत्वं भविष्यतीति वाच्यम् । अनृतवदनक्रतुधर्म्मताधिकरणन्यायेन तत्र क्रत्वर्थताया एवार्थप्राप्तत्वात् । तथाहि सत्यमेव वदेन्न त्वनृतमिति पुरुषार्थः संयोगः । तस्मादन्यस्तु दर्शपूर्णमासप्रकरणे नानृतं वदेदिति

निषेधः श्रूयते। स क्रत्वर्थः संयोगः॥ क्रत्वर्थश्च विधिर-प्राप्तः पुरुषार्थविधिनेत्यप्राप्तत्वाद् विधीयते। तत्र क्रत्वर्थ-विधिव्यतिक्रमे क्रतोर्वैगुण्य न तु पुरुषस्य प्रत्यवायः। पुरु-षार्थनियमातिक्रमे तु पुरुषस्यैव प्रत्यवायो न क्रतोर्वैगुण्य-मित्ययमर्थस्तृतीयलक्षणे– "अकर्म्म क्रतुसंयुक्तं संयोगा-न्नित्यानुवादः स्याद्। विधिर्वा संयोगान्तराद्"—इति पूर्व-पक्षसिद्धान्तसूत्राभ्यां व्यवस्थापितो मीमांसातन्त्रे। एवमिह समुद्रयानं न कुर्यादिति पुरुषार्थः संयोगः स्यात् तद्व्यति-क्रमे पुरुषः केवलं प्रत्यवेयात् न क्रतोर्वैगुण्यम्। तदन्यस्तु श्राद्धकरणे समुद्रयायी कृतहा श्राद्धे वर्ज्य इति क्रत्वर्थः संयोगः। तद्व्यतिक्रमे श्राद्धवैगुण्यमात्रं न तु समुद्रगन्तुः पुरुषस्य कश्चित् प्रत्यवायगन्धः प्रसज्जते। तस्मात्तयोर्विध्यो-र्विभिन्नविषयकतया तदेकवाक्यत्वासंभवान्नैष भवतां कल्प्यः प्रतिषेधविधेः समुद्रगन्तारं पातित्येनाभियोजयेत्। अत एव चालं व्यर्थया प्रतिषेधविधिकल्पनयेत्यास्ताम्। तथा च प्रकृतेभ्यो मनुमरीच्यादिस्मार्तवचनेभ्यः समुद्रगन्तुर्दोषापादनं सर्वथैवाशुद्धमिति विदांकुर्वन्तु विद्वांसः।

## इति समुद्रयायिनः श्राद्धवर्ज्यताखण्डने द्वितीयः प्रकारः २

## इति श्राद्धवर्ज्यत्वप्रकरणं परीक्षितम्

ननु मास्तु मन्त्रादिवचनेभ्यः समुद्रगन्तरि पातित्य-सम्बन्धः, अथापि समुद्रयानगमनमिति वृद्धपराशरवचनाद्, अथ पतनीयानीति बौधायनवचनाच्च तत्र पातित्य-सिद्धिर्दुर्वारा । अनारभ्याधीतयोस्तयोः पुरुषं प्रत्येव प्रत्य-वायप्रवर्तकयोः पुरुषार्थत्वस्य निष्प्रतिपन्नत्वादिति चेत् सत्यम् । अत्रेयं तावज्जिज्ञासा समुत्तिष्ठते । उभाभ्यामप्येताभ्यां पराशरबौधायनवचनाभ्यामेकविधैव समुद्रयात्रा प्रतिषिध्यते अथवा अस्ति कश्चित्तयोर्विशेष इति । यद्यत्र समानविषय-त्वमभ्युपगम्यते तर्हि पातकसाम्यात् प्रायश्चित्तसाम्यं प्राप्नोति । दृश्यते त्वेकत्र त्र्यब्दप्रायश्चित्तविधिरपरत्र पुनःसंस्कार इति तारतम्यम् । विभिन्नविषयकत्वे तु कीदृश्यां समुद्रयात्रायां कः प्रतिषेध इत्याक्षिप्यते । तत्र तावदेके समादधते । समुद्रयात्रासम्बन्धेन विशेषानपोढत्वात् तदंशे समानविषयकयोरप्यनयोरधिकारिसंबन्धेन विशेषस्याविवक्षितत्वात् प्रायश्चित्तभेदो युज्यते । एकत्र सर्ववर्णसाधारण-तया सामान्यतस्त्र्यब्दविधानादपरत्र ब्राह्मणसम्बन्धेन विशिष्य पुनःसंस्कारविधानात् त्र्यब्दविधौ ब्राह्मणातिरिक्तत्वेन संकोचः प्रवर्तते इति ॥ १ ॥

अन्ये तु वर्णविशेषानुपादानेन विहितानां प्रायश्चित्ताना-मृविप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतम्—

वैश्ये ऽर्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥

इति विष्णूक्तेर्यथोक्तरूपेण ब्राह्मणपरतयैवावगमादुभयवचनयोः सर्वथा समानविषयत्वेऽपि प्रायश्चित्तभेदो विकल्प्य द्रष्टव्यः। एकैकस्मिन् पातकेऽनेकेषां चान्द्रायण–गोदान–प्राणायाम–गायत्रीजप–शतरुद्रीयावर्तन–वेदपारायण–दिव्यतीर्थविहरणादीनां गुरुलघुरूपाणां प्रायश्चित्तानां वचनभेदेन विहितानामन्यत्रापि विकल्पेनैव व्यवस्थापितत्वादित्याहुः ॥ २ ॥

इतरे तु न हि त्र्यब्दप्रायश्चित्तप्रक्रियाऽन्तरेण पुनः संस्कारं यथावत् पापापनुत्तये क्षमते, त्र्यब्दव्रतेन वैगुण्यविनिवृत्तावपि साद्गुण्यसम्पत्तेः पुनः संस्काराधीनतया समुच्चित्यैव प्रवृत्तेरुचितत्वादित्याचक्षते ॥ ३ ॥

केचित्तु ब्राह्मणानामेवैतद्विशिष्य विधानात् तत्सम्बन्धेन पुनः संस्कारसमुच्चितस्य त्रैवार्षिकव्रतस्य शुद्धित्वेऽपि क्षत्रियादीनां त्रैवार्षिकव्रतस्य शुद्धित्वेऽपि क्षत्रियादीनां त्रैवार्षिकव्रतमात्रं शुद्धिरित्याहुः ॥ ४ ॥

परे तु बौधायनवाक्येन सामान्यतो विहितस्य समुद्रयानप्रतिषेधस्य सर्ववर्णसाधारण्येन प्राप्तावुपतिष्ठमानं परा-

शरवचनं तस्य ब्राह्मणमात्रपरत्वं व्यवस्थापयतीति ब्राह्मणानामेव समुद्रयानप्रतिषेधो न क्षत्रियादीनाम्। समुद्रयानगमनं न शस्यते इत्येतदुक्तिमात्रेणैव सिद्धौ ब्राह्मणपदोपादानस्य क्षत्रियादिसम्बन्धविनिवृत्तवेव तात्पर्य्यावसायात् यथा हि—"मृतानुगमने नास्ति ब्राह्मण्या ब्रह्मशासनात्" इति सामान्यनिषेधः "पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति" इत्येनन विशेष उपसंह्रियते इत्येवमुपसंहाररूपः प्रतिषधो मीमांसाबालप्रकाशे दर्शितः। एवमेव "अथ पतानीयानि समुद्रसंयानमिति बौधायनोक्तः सामान्यनिषेधः "समुद्रयानगमनं ब्राह्मणस्य न शस्यते" इत्यनेन विशेषे उपसंह्रियते इति द्रष्टव्यम् न चैवमुपसंहारे स्वीक्रियमाणे न ब्राह्मणं हन्यादित्यस्यापि विधेर्न हिंस्यात् सर्वभूतानीत्येतत्सामान्यविध्युपसंहारत्वापत्तौ ब्राह्मणातिरिक्तप्राणिवधे दोषाभावप्रसङ्ग इति वाच्यम्। न हिंस्यात् सर्वभूतानीति निषेधापवादतया—

एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः॥

इत्यादिस्मृतिभिर्वैधहिंसाविधानात् तदपवादार्थं प्रवृत्तस्य न ब्राह्मणमिति प्रतिषेधस्योपसंहारत्वासंभवात्। तस्माद्ब्राह्मणानामेव समुद्रयानगमनं निषिद्धं न त्वन्येषां क्षत्रिया-

दीनामिति सिद्धमित्याडम्बरयन्ति ॥ ५ ॥

तेष्वेतेषु परैरुपादीयमानेषु सुन्दोपसुन्दन्यायेन परस्परप्रतिबाधविनशनीयेषु तुच्छप्रायेषु पञ्चसु पक्षेषु कः पक्षो युक्तियुक्त इति निश्चिन्वन्तु विपश्चितः ।

प्रेक्षापूर्वकारिणस्तु संप्रेक्षन्ते । न तावदयं निषेधस्तीर्थयात्राङ्गसमुद्रयात्राविषयः । तीर्थयात्रां विना गत्वेति वाक्यशेषेण निषेध्यदेशप्रतिषेधमात्रे तुल्यन्यायादेकत्र निर्णीतः शास्त्रार्थ इति वाचोयुक्त्या तीर्थयात्रातिरिक्तत्वेन संकोचस्य—

एतच्च तीर्थयात्राव्यतिरेकेण द्रष्टव्यमिति ( ३ अ० २६३ श्लो० ) मिताक्षराक्षरास्वारस्येन लाभात् तथैवाचाराच्च । अत एव न प्रायश्चित्ताङ्गसमुद्रयात्राविषयोऽपि । नियतयोजनायामविस्तारविशिष्टस्य सेतोरपि तीर्थानतिरिक्ततया तत्राप्येतदप्रवृत्तेः । न च समानतन्त्रविहितायाः प्रायश्चित्ताङ्गयात्राया ब्राह्मणातिरिक्तत्वेन संकोचार्थमिदं शास्त्रं स्यादिति वाच्यम् ।

सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेत सागरम् ।
यजेत वाश्वमेधेन राजा तु पृथिवीपतिः ॥

इति वचने तु पदेनाश्वमेधस्य राजमात्रगोचरत्वेऽपि सेतुदर्शनघटितसमुद्रयात्राया यावद्वर्णसाधारणत्वावसायात्। प्रायश्चित्तयात्राया वैधतया तदपवादार्थं प्रवृत्तेऽस्मिन् शास्त्रे मोहेनेति पदस्वारस्यभङ्गापत्तेश्च। तस्मात् सिद्धं धर्म्मार्थयात्राविषयो नायं निषेध इति।

अथैवं न प्रत्यन्तदेशगमनाङ्गभूतसमुद्रयात्राविषयोऽप्ययं निषेधः सिद्धो भवति। तथाहि गृहत्यागादारभ्य प्रत्यन्तदेशप्राप्तिपर्यन्तमाश्रितक्रमरूपाया गमनक्रियाया ऐक्यात्तत्रान्वितस्य समुद्रयानद्रव्यस्य समुद्रस्य वा न प्रत्यन्तदेशगमनप्रयोज्यपातित्यातिरिक्तपातित्यप्रयोज्यकत्वं तावच्छक्यं वक्तुम्। "यस्य पर्णमयी जुहूर्भवती न स पापं श्लोकं शृणोती" त्यत्र पापश्लोकश्रवणाभावित्यवदिहापि "द्रव्यसंस्कारकर्म्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्याद्" इति सूत्रोक्त्या प्रायश्चित्तविधिसूचितपातित्यस्यार्थवादत्वात्। यत्तु समुद्रगमनक्रिया न त्वेव प्रत्यन्तदेशगमनक्रियास्वरूपानुगता युक्ता वक्तुम्। तथात्वे स्थूलवर्त्मनिष्पन्नायाः प्रत्यन्तदेशगमनक्रियायाः समुद्रगमनक्रियारूपाङ्गवैकल्यात् तत्त्वानापत्तौ न म्लेच्छविषयं गच्छेदिति निषेधविषयतानापत्तिः स्यादिति कश्चिद् ब्रूयात्। तत्तुच्छम्।

"क्रियाणामाश्रितत्वाद् द्रव्यान्तरे विभागः स्यात् । अपि वाऽव्यतिरेकाद्रूपशब्दविभागाच्च, गोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववदिति" पूर्वपक्षसूत्राभ्यां ( ६ । ३ । ३ । ) व्रीहिनीवारादिद्रव्यभेदेऽपि दर्शपौर्णमासयागैक्यवत् समुद्रमार्गस्थलभेदेऽपि तद्भेदासम्भवात् ।

यच्च वदन्ति । अनारभ्याधीतस्यापि तत्र पर्णमयीत्वस्य वाक्येन क्रतुसम्बन्धेऽभ्युपगम्यमानेऽपि प्रकृतेऽनारभ्याधीतस्यास्य समुद्रयानस्य न प्रत्यन्तदेशगमनार्थत्वेनान्वितस्य पातित्यप्रयोजकत्वमुपदिश्यते किन्तु स्वतन्त्रमिदं शास्त्रमक्रत्वर्थं पुरुषं प्रत्येव समुद्रयात्रायाः पातित्यप्रयोजकत्वं विदधत् प्रवर्तते तथा च यत्रापि समुद्रयानेन प्रत्यन्तदेशगमनमभिनिष्पन्नं तत्रापि प्रत्यन्तदेशगमनक्रियायाः समुद्रयानघटितायाः पातित्यप्रयोजकत्ववदवान्तरमप्यस्याः स्वस्वरूपतः सिद्धायाः समुद्रयात्राया अव्याघातात् तस्याश्च स्वातन्त्र्येण पातित्यप्रयोजकताया अनेन शास्त्रेणबोधनात् प्रत्यन्तदेशगमनप्रयुक्तपातित्यातिरिक्तमैक्येन पातित्यं प्रसज्जते इति केचित् । तदप्येतदविचारसहमनादेयम् । सप्तसंस्थे ज्योतिष्टोमेऽग्निष्टोमनियतपूर्वस्योक्थस्तोमस्य तन्नियतपूर्वस्य चातिरात्रस्तोमस्याचरणेवान्तरानुष्ठितस्याग्निष्टोमादेरुक्थादिस्वरूपसिद्धौ विनियुक्तस्य तत्वस्वरूपसिद्ध्यतिरिक्तफलप्रदातृत्वानभ्युपगमाद्,

अग्निष्टोमसंस्थस्यैव ज्योतिष्टोमस्यानुष्ठाने तु तस्यैवाऽदृष्टोत्पादकत्वदर्शनात्, प्रकृतेऽपि तन्नयायेन प्रत्यन्तदेशगमनस्वरूपसिद्धौ विनियुक्तस्य समुद्रयानस्य पार्थक्येन फलप्रदानविनियोगायोगात्, तस्माद् यत्रैव प्रत्यन्तदेशमगत्वासमुद्रमेवोद्दिश्य वृत्त्यर्थं चित्तविनोदार्थं वा समुद्रं गच्छेत् तत्रैवायं निषेधस्तदतिक्रमे च पातित्यसम्भवो न तु प्रत्यन्तदेशं गन्तुमीहमानस्य तदुपायभूतसमुद्रयानमुपायान्तराभावादनिच्छयाऽप्यङ्गीकृत्य प्रवर्तमानस्य तया समुद्रयात्रया कथंचित् पातित्योत्पत्तिरनेन शास्त्रेण बोद्ध्यत इति सिद्धम् ॥

एतनैव च बौधायनवचनमपि तुल्यन्यायाद् व्याख्यातम् ॥

# इति समुद्रयात्रानिषेधस्याऽनुषङ्गिकेतर-परत्वनिरूपणम् (१)

इदं तु पुनरत्रावधेयम् यदपीदं वृत्त्यर्थस्य चित्तविनोदार्थस्यापि वा समुद्रयानस्य निषेध्यत्वमिदानीं यावत् व्याख्यातं तदपि दाक्षिणात्यसम्बन्धेनैव द्रष्टव्यं न तु विन्ध्योत्तरवासिनां ब्राह्मणादीनां यथाकथंचिदपि समुद्रसंयाने कश्चिद्दोषः प्रसज्जते । स्मृतिरत्नाकरे कलिविशेषधर्मे—

"पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः । यानि दक्षिणतस्तान्यनुव्याख्यास्यामः । यथैतदनुपनीतेन सह भोजनं स्त्रिया सहभोजनं पर्युषितभोजनं मातुलसुतागमनं पितृष्वसृदुहितृगमनमिति । अथोत्तरतः ऊर्णाविक्रयः, सीधुपानम्, उभयतोदद्भिर्व्यवहारः, आयुधीयकम्, समुद्रसंयानमिति । तदितर इतरस्मिन् कुर्वन् दुष्यति देशप्रामाण्यात्" ।

इत्येवमाचक्षाणेन भगवता बौधायनेन दाक्षिणात्यपरतयैव तन्निषेधं व्यवस्थाप्य विन्ध्योत्तरवासिनां तदनुष्ठाने दोषाभावबोधनात् । व्याख्यातं चेदं सूत्रं स्मृतिमुक्ताफले—

नर्मदामारभ्य कन्यातीर्थपर्यन्ते दक्षिणदेशे । तथा विन्ध्याद्रिमारभ्य हिमाद्रिपर्यन्तमुत्तरदेशे इति । उभयतोदद्भिरश्वादिभिः क्रयविक्रयादिः । आयुधीयकमायुधेन जीवनम् । ऊर्णा मेषादिलोम, तत्कृतकम्बलादिविक्रय इत्यादिना ॥ अत्र सीधुपानं भङ्गादिमादकरसग्रहणम्, वैद्यकपरिभाषायां तस्य तत्परतयैव व्यवस्थापनात् ।

एवं स्मृतिमुक्ताफल आचारकाण्डे मातुलसुतापरिणय-पशुहिंसाविचारप्रकरणे स्मृतिरत्नाकरे च व्यासवाक्यं हेमाद्रौ प्रायश्चित्तखण्डे मरीचिवाक्यं चामुमेवार्थं द्रढयति तथाहि ।

अब्रह्मचारिदाराद्यैः सार्द्धं भोजनकर्म च ।
मातुलादिसुतायाश्च विवाहः शिष्टसम्मतः ॥
एतानि दाक्षिणात्यानामविगीतानि धर्मतः ॥१॥
समुद्रयानं मांसस्य भक्षणं शस्त्रजीविका ॥
सीधुपानमुदीच्यानामविगीतानि धर्मतः ॥ २ ॥

इति व्यासो मरीचिश्च ।

यत्तु केचित् । नारदपराशरादिवचने तावत्कलौ समुद्र-यात्रानिषेधः, अथ बौधायनव्यासादिवचने समुद्रयात्राविधिः इत्येवं विरोधे तदुभयोः सामञ्जस्यं कर्तुमिवैतद्बौधायनादि वचनस्य पञ्चधा विप्रतिपत्तिरित्यादेः कलीतरपरत्वेन सङ्कोच्य व्यवस्थानं युक्तमित्याचक्षते; तदविचारात् । नारदपराशरादिवचने तावन्निर्दिष्टरीत्या कलौ ब्राह्मणानां वृत्तिरूप-समुद्रयात्रा निषेधः, बौधायनव्यासादिवचने तु दाक्षिणात्येतरब्राह्मणानामानुषङ्गिकसमुद्रयात्राविधिरित्येवं विषयभेदेन व्यवतिष्ठमानयोर्वचनजातयोर्विरोधस्यैव दूरापास्तत्वात् ।

सत्यपि वा विरोधे निषेधविधौ दाक्षिणात्येतरब्राह्मणातिरिक्तत्वेन सङ्कोचोपपत्तेस्तावतैव सामञ्जस्यसिद्धौ बौधायनवचनस्य कलीतरपरत्वेन व्याख्यानायोगात्। एकत्र ब्राह्मणानां निषेधः, अन्यत्र दाक्षिणात्यब्राह्मणानामेव निषेध इत्युभयवचनैकवाक्यतानुरोधेन सामान्यशास्त्रस्यापि विशेषपरत्वेनैवोपसंहारलाभाद्विरोधपरिहारे कलीतरपरत्वव्यवस्थायानिर्बीजत्वाच्च।

अथ प्रामाणिकानेकनिबन्धोल्लिखितव्यवस्थाविरुद्धश्चायं कलीतरपरत्वेन सङ्कोचप्रकारः। यथाहि स्मृतिरत्नाकरे तावत्कलिविशेषधर्मान् प्रकृत्यैव "पञ्चधा विप्रतिपत्तिः" इत्यादिवचनोल्लेखः प्रवर्तमानो दृश्यते। स च कलीतरपरत्वेन व्यवस्थायां विरुध्येत।

विधानपारिजाते तु पञ्चधा विप्रतिपत्तिरित्यादिबौधायनवचनसिद्धं दाक्षिणात्यानां मातृसपिण्डाविवाहं प्रकृत्य तादृशविवाहस्य कलियुगेऽप्यादरणीयत्वं महताऽऽरम्भेण प्रपञ्चितम्। तथाहि—

इदञ्च यस्मिन्देशे अविगीतं तत्रैव कार्यं नान्यत्र। तथाप्ययं मातुलकन्याविवाहो यद्देशेऽविगीतस्तद्देशीयैरेव कार्यः। तदुक्तं नृसिंहचर्यायां बौधायनेन—

"पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः । यानि दक्षिणतस्तान्यनुव्याख्यास्यामः । यथा—दक्षिणदेशे अनुपनीतेन भार्यया च सह भोजनम् पर्युषितभोजनम् मातुलसुतायाः पितृष्वसृसुतायाः परिणयश्च ॥ तथा उत्तरदेशे सिन्धुपारगमनम्, उभयतो दद्भिर्व्यवहारः, ऊर्णाविक्रयः, आयुधविक्रयः, समुद्रयानं च ॥ मध्यदेशे द्विजाः कर्मकराः शिल्पिनश्च । पूर्वदेशे द्विजा मत्स्यादाः स्त्रियो व्यभिचारिण्यो रजस्वलाश्च स्पृश्याः ॥ इत्यादयः स्व - स्वदेशे धर्मा अन्यत्राधर्मा इति । तत्रेतर इतरस्मिन्नकुर्वन् दुष्यतीति ।"

केचिदिदं कलौ निषिद्धम्—"गोत्रान्मातृसपिण्डात्तु विवाहो गोवधस्तथा" इति माधवोदाहृतब्रह्मपुराणवचनादित्याहुः । तदेतदपरे न क्षमन्ते" ॥

इत्यादिना प्रबन्धेन मातुलसुतापरिणयस्य दाक्षिणात्य ब्राह्मणपरतया सर्वयुगसाधारण्येन व्यवस्थानं विधीयते, न तु कलिवर्ज्यतासमर्पकं "गोत्रान्मातृसपिण्डात्तु" इत्यादिवचनमनुरुध्य पञ्चधा विप्रतिपत्तिरिति बौधायनवचनस्य कलीतरपरत्वेन संकोचः क्रियते । तदित्थमेकत्र निर्णीतः शास्त्रार्थ इति न्यायात्समुद्रयात्राप्रतिषेधसमर्पकं कलिवर्ज्यप्रकरणस्थं नारदादिवचनमप्यनुरुध्य पञ्चधा विप्रतिपत्तिरित्यादि बौधायनवचनस्य कलीतरपरत्वेन सङ्कोचः शास्त्रसप्रदायविरुद्ध

एवेत्यत्रगन्तव्यम् । यथा च माध्यन्दिनविषयतया “गोत्रान्मातृसपिण्डात्तु” इत्यादिवचनस्य कलिवर्ज्यप्रकरणस्थस्य चरितार्थ्यं तेनाभ्युपगम्यते तथैव खलु ब्रह्मघातकादिपरतया समुद्रयात्रा निषेधकवचनस्य कलिवर्ज्यप्रकरणस्थस्य चरितार्थ्यं समुन्नेयमिति दिक् ।

यत्तु कलिनिषिद्धस्यायुधीयकस्य सहपाठादस्य समुद्रयानस्य कलिनिषिद्धत्वं कैश्चिदुन्नीयते तत् साहसमात्रम् । अनेकेषां कल्पप्रतिषिद्धानामूर्णाविक्रयशीधुपानादीनामपि सहपठिते समुद्रयाने कलिनिषिद्धस्यायुधीयकस्य सहपाठेन कलिनिषिद्धत्वव्यवस्थाया अन्याय्यत्वात् ।

किञ्च ‘उक्तबोधायनसूत्रे समुद्रयानस्यौत्तरीयद्विजधर्मत्वप्रतिपादनं कलीतरयुगाभिप्रायेण’ इत्येवं हि त आतिष्ठन्ते वादिनः । तदेतत् स्वप्रतिज्ञाविरोधात्सूत्रार्थमनभिज्ञायैव व्यवस्थाकरणाच्च नितान्तं भ्रान्तम् । “कलियुगे द्विजानां समुद्रयानं सामान्यतोधर्मशास्त्रनिषिद्धम्” इत्येवं तावत्प्रतिज्ञायोप क्रमणात्, उत्तरग्रन्थेऽपि कलिनिषेधसमर्पकवचनभाराणामेवोल्लेखात्, सर्वयुगसाधारण्येन निषेधसमर्पकवचनस्य कुत्राप्यस्मरणाच्च युगान्तरे सर्वविधब्राह्मणसम्बन्धेन समुद्रयानस्याप्रतिषेधविहितत्वं सम्प्रतिपन्नमस्तीत्येतत्तावदसंन्दिग्धं प्रतिभाति । तथा चैतेषां दाक्षिणात्यानामौत्तरीयाणां च सर्व-

विधानामेव द्विजानां युगान्तरे समुद्रयाने नाधर्म इत्युक्तप्रायम्। इदानीम्पुनरौत्तरीयाणामेव द्विजानां युगान्तरे समुद्रयानं नाधर्म इत्ययमर्थोऽनेन बौधायनसूत्रेण संसाध्यते। तदेतत् पूर्वापरविरुद्धत्वादसमञ्जसं भवति।

अथ कश्चिद् ब्रूयात्। 'समुद्रयायी बन्दी च तैलिकः कूटकारकः' । इति मनुस्मृत्यादिवचनानुरोधात् सर्वयुगसाधारण्येनापाततः सर्वविधब्राह्मणसम्बन्धेन समुद्रयानस्य प्रतिषिद्धत्वे प्राप्ते प्रवर्तमानं बौधायनवचनं तावदौत्तरीयद्विजसम्बन्धेन समुद्रयानस्याप्रतिषिद्धत्वं समर्थयदवशेषाद्दाक्षिणात्यब्राह्मणसम्बन्धेनैव तानि समुद्रयानप्रतिषेधसमर्पकाणि मन्वादिवचनानि नियमयति। तथा च सर्वयुगसाधारण्येन समुद्रयानस्यौत्तरीयद्विजकर्तृकस्याप्रतिषिद्धत्वे,दाक्षिणात्यद्विजकर्तृकस्य च प्रतिषिद्धत्वे प्राप्ते प्रवर्तमानं पुनरन्यदिदं कलिनिषेधसमर्पकपुराणवचनं दाक्षिणात्यानामिवौत्तरीयाणामपि द्विजानां समुद्रयानस्य कलौ निषिद्धत्वं पर्यवसाययति। तेन युगान्तरे केवलं दाक्षिणात्यानामेव समुद्रयाने दोष आसीत्, नौत्तरीयाणाम्। कलियुगे तु दाक्षिणात्यानां चौत्तरीयाणां च सर्वविधानामेव द्विजानां समुद्रयानं सामान्यतो

धर्मशास्त्रनिषिद्धमस्तीत्यर्थो लभ्यते । तथा च प्रतिज्ञाविरोधदोषो नास्तीति चेद् ।

अत्रेदं प्रतिवक्तव्यम् । भवेदेवं समाधानं यदि तत्कल्पनावशंवदत्वान्नारदीयाद्युपपुराणवचनं तावद् बौधायनवचनशेषः स्याद्, बौधायनवचनं च मन्वादिवचनशेषः स्यात् । न च तथा शेषशेषिभावे किञ्चित् प्रमाणमुपलभ्यते । स्वतन्त्राणि च तानि सर्वाणि शास्त्राणि । तेषां विभिन्नविषयकत्वाद्, विरोधाभावाच्चैकानुरोधेनान्यस्य विषयसङ्कोचो न प्राप्नोतीति बहुशः प्रागुपदर्शितम् । अथ परस्परसमन्वयेनैकार्थ्यं कर्तुमेकवाक्यतैव तावदिष्यते चेत् सा यथेच्छमनेकधा संभवति तत्राशक्यं तावदन्यतमं पक्षमाश्रयितुम् । तथाहि मन्वादिवचनेन तावत् समुद्रयात्रापरिशीलनकर्तॄणां श्राद्धे वर्ज्यत्वमुच्यते, 'नोच्यते तु किंयुगीयानां किंदेशीयानां किंजातीयानां वर्ज्यत्वमिति' तत्रेदमुपतिष्ठमानानि तानि मुनिवचनानि यथास्थानमन्वयं लब्ध्वैकवाक्यतां गच्छन्ति स्वस्वविषयसमर्पणेन स्थानेऽनुग्रहं करिष्यन्ति । तत्र नारदीयादिवचनेन[1] तावत् कलियुगीयानाम्, बौधायनवचनेनतु[2] दाक्षिणात्यानाम्, अथ पराशरवचनेन[3]

---

१. समुद्रयात्रास्वीकारः कमण्डलुविधारणम् । इत्यनेन ।

२. पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः । इत्यादिना ।

३. समुद्रयानगमनं ब्राह्मणस्य न शस्यते । संभवेद्यदि मोहेन पुनः संस्कारमर्हति । इत्यनेन ।

ब्राह्मणानाम्, इत्येवं परस्पराप्रतिबाधनैकवाक्यत्वे कृते 'कलियुगीयानां दाक्षिणात्यानां ब्राह्मणानां समुद्रयात्रापरिशीलनकर्तृणां श्राद्धे वर्ज्यत्वम्" इत्येवार्थः सर्वपर्यवसितः प्राप्नोति, न प्राप्नोत्यन्ययुगीयानामपि दाक्षिणात्यानां वर्ज्यत्वं, न च वा प्राप्नोति कलियुगीयानामप्यौत्तरीयाणामिति निष्पक्षपाता अदुराग्रहग्रहिलाः परिशीलयन्तु ॥१॥

अथ यदि मनुवचनं न समुच्चीयते, तत्रापि पराशरवचनेन तावद् ब्राह्मणानां दोषः बौधायनवचनेन दाक्षिणात्यानां दोषः, नारदीयादिवचनेन तु कलियुगे दोषः, तथा चैतेषामेकवाक्यतायां, कलियुगे दाक्षिणात्यानां ब्राह्मणानां समुद्रयाने दोष इत्येवार्थः पर्यवसितो लभ्यते ॥ २ ॥

यदि वा 'द्विजस्याब्धौ तु निर्यातुः शोधितस्यापि संग्रहः इति स्मृतिसंग्रहवचनस्य 'अथोत्तरतः समुद्रयानमिति' बौधायनवचनस्य चेत्येवमुभयोरेवैकवाक्यत्वमभिलषितं नान्येषां वचनानामिति चेद् गाढमभिलष्यतां तथैव। न त्वेव तावतापि कलियुगे द्विजानां समुद्रयानं सामान्यतो निषिद्धं प्राप्नोति। तथा हि तावदन्यत्र सामान्यत निषिद्धार्थानां देशभेदेनाप्रतिषिद्धत्वं विदधतो बौधायनीयदैशिकविप्रतिपत्तिवचनस्य अवश्यं प्रतिप्रसवशास्त्रत्वमभ्युपगम्येत। शास्त्रान्तरेण सामान्यतः प्रतिषिद्धेष्वेवं तत्तदर्थेषु देश-

विशेषेऽनुवर्तमानाया विप्रतिपत्तेरनेनोपदर्श्यमानत्वात् । समुद्रयात्राया निषेधसमर्पकं च तत्सामान्यशास्त्रं 'द्विजस्याब्धौ तु निर्यातु' रित्यादिकं न युगान्तरेपि समुद्रयात्रायाः प्रतिषेधं विधत्ते, अपि तु कलियुगे एवेति भूयो भूयः स्मर्तव्यम् । यस्य निषेधस्तस्यैवायं देशविशेषे धर्माय पुनः प्रसवः । तेनैतदुभयोरेकवाक्यतायाम् " औत्तरीयद्विजानां कलावपि समुद्रयात्रा न प्रतिषिद्धा, प्रतिषिद्धा तु सा दाक्षिणात्यानाम्" इत्येवार्थो निष्कर्षसिद्धो लभ्यते इति चक्षुष्मताऽवलोक्यम् ॥ ३ ॥

तदित्थमन्यथा वा यथेच्छं क्रियमाणेऽपि तेषां वचनानां समन्वयेनैकवाक्यत्वे कलौ दाक्षिणात्यानामेवेदं समुद्रयानं दोषाय स्यान्नौत्तरीयाणाम् ।

तथा च कलियुगे सामान्यतो द्विजानां समुद्रयाने दोषो न प्राप्नोति । तस्मान्नितान्तं स्वप्रतिज्ञाविरुद्धोऽयं ग्रन्थः ॥

अथ वा बौधायनवचनेन तावत् सर्वयुगसाधारण्येनौत्तरीयद्विजानां समुद्रयानधर्मे विधित्सिते प्रवर्तमानं कलिप्रकरणमस्य बौधायनवचनस्य कलीतरयुगपरत्वे तात्पर्यं ग्राहयेत् । तेनैषामौत्तरीयाणामेव समुद्रयानं युगान्तरे कृतमदोषायेति सिध्यत्यर्थः । कलौ त्वौत्तरीयाणां समुद्रयानं दोषायैव स्यात् । दाक्षिणात्यानां तु समुद्रयानं न विधिर्न वा प्रतिषेधः इत्येवं वैपरीत्येनापि कश्चिदिह प्रत्य-

वस्थातुं शक्नोति । तत्रापि पक्षे द्विजानां समुद्रयानं सामान्यतो निषिद्धमित्येवं प्रतिज्ञाया विरोधो दुर्निवारः । तस्मान्नूनं बौधायनवचनस्य कलीतरपरत्वेन संकोचाभिप्रायकोयमुत्तरग्रन्थः पूर्वग्रन्थं सामान्यतो द्विजानां समुद्रयानप्रतिषेधसमर्थकं समूलं व्यापादयतीति सर्वथा तुच्छमेतदामूलमसारं चेति परिहीयते ॥

तथा चेत्थं विन्ध्योत्तरवासिनां समुद्रयाने दोषाभावविधानात्—"समुद्रयानगमनं ब्राह्मणस्य न शस्यते—"इति सामान्यशास्त्रस्य दाक्षिणात्यब्राह्मणपरत्वेनोपसंहार इति सर्वमनवद्यम् ।

इति समुद्रयायिनो ब्राह्मणवर्ज्यताया दाक्षिणात्यब्राह्मणपरत्वेन व्यवस्थापनम् ।

इति ब्राह्मणवर्ज्यत्वप्रकरणं परीक्षितम् ।

❀ श्रीः ❀

# शुद्धिपत्रम्

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १ | १६ | तदित्थे | तदित्थं |
| १ | १६ | संभृत्य | संभृत |
| ३ | ४ | हेमाद्या | हेमाद्या् |
| ४ | १६ | शूऽद्रा | शूद्रा |
| ५ | ७ | भुञ्ज | भुञ्जी |
| ,, | १८ | श्राद्ध | श्राद्ध |
| ७ | १० | नियानेष्वयः | निपानेष्वपः |
| ,, | १३ | घृतं | घृतं |
| ,, | १६ | साम्यं | साम्यं |
| ८ | ४ | रिबाम्भसि | रिवाम्भसि |
| ,, | ६ | भण्ड | भाण्ड |
| ९ | ७ | सिद्धोन | सिद्धेन |
| ,, | ९ | यतित संसर्गें | पतितसंसर्गें |
| ,, | १० | पतित्य | पातित्य |
| ,, | १२ | यातायां | यात्रायां |
| १० | ५ | निषेधा | निषेध |
| ,, | ७ | वाक ता | वाक्यता |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १० | १५ | संहृयते | संह्वियते |
| ११ | ८ | कर्माणि | कर्मणि |
| १२ | १८ | दू वश्यं | दवश्यं |
| ,, | १९ | मिदानी | मिदानीं |
| ,, | ,, | मैदम्ययँ | मैदम्पयँ |
| ,, | १६ | कालऽपि | कालेऽपि |
| ,, | २१ | वर्तेरन | वर्तेरन् |
| १३ | ७ | तिश्रः | तिस्रः |
| ,, | ,, | नासत्य | नासत्या |
| ,, | २० | ऐवमेव | एवमेव |
| १४ | ३ | स्रभि | स्नुभि |
| ,, | ४ | दृष्टि | दृषि |
| ,, | ५ | यान्तु | यान्नु |
| १५ | ६ | चवै | चैव |
| ,, | १७ | द्वीपेशु | द्वीपेषु |
| १७ | ६ | पक्तिश्रूयते | पक्तिःश्रूयते |
| ,, | ७ | द्वीपाधीश्वर | द्वीपाधीश्वर |
| ,, | १८ | तदावि | तदवि |
| ,, | १९ | नदर्श | निदर्श |
| ,, | २० | भावे तु | भवितु |
| ,, | २१ | विशेधा | विरोधा |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १८ | ४ | मनुक्त्या | मनूक्त्या |
| ,, | ,, | श्रुत्युनु | श्रुत्यनु |
| ,, | ८ | गभनाङ्ग | गमनाङ्ग |
| २१ | १६ | मभद्द | मभद्य |
| ,, | १६ | नेष्टवा | नेष्ट्वा |
| २३ | ६ | त्यत्रकली | त्यत्रकलि |
| २४ | ७ | णात्त | णान्त |
| ,, | १४ | वाक्यस्त | वाक्यस्य |
| २७ | ४ | र्त्यन्तो | र्त्यन्ते |
| ,, | १० | तानि | तानी" |
| २८ | १० | शक्तस्यं | शक्तस्य |
| ,, | ११ | व्द्यति | द्व्यति |
| ,, | १५ | दादिद्द्रा | दारिद्या |
| २६ | १२ | दूस्यात्रा | दूरयात्रा |
| ,, | १८ | द्विजाप्याणां | द्विजाग्याणां |
| ३१ | २ | ग्प्राणां | ग्र्याणां |
| ,, | ३ | ग्प्राणा | ग्र्याणां |
| ,, | १२ | र्दीशभिः | दर्शिभिः |
| ३६ | १८ | श्रुत्युनु | श्रुत्यनु |
| ३७ | १ | ह्यानु | ह्यनु |
| ,, | १८ | ग्याणां | ग्याणां |
| ३६ | २ | भियेण | भिप्रायेण |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ४१ | ८ | कथा | कथ |
| ,, | १६ | नतर | नितरां |
| ४२ | ४ | मता | मिता |
| ४३ | ८ | सामुदि्क | सामुद्रिक |
| ,, | ६ | समुदे | समुद्रे |
| ४५ | ५ | स्तवत्त्व | स्तत्त्व |
| ४६ | २० | पुरुषार्थं त्वं | पुरुषार्थत्वं |
| ४६ | ७ | ङ्गति | इति |
| ५१ | ३ | वैगुण्य | वैगुण्यं |
| ,, | ८ | तद | तद् |
| ,, | १० | श्राद्धकरणे | श्राद्धप्रकरणे |
| ५२ | ७ | बौघायन | बौधायन |
| ,, | १३ | पोल्लत्त्वात् | पेल्लत्वात् |
| ,, | २० | मृ्विप्रे | मृ-विप्रे |
| ५४ | ४ | निवृत्तवेव | निवृत्तावेव |
| ,, | ,, | तिषधो | तिषेधो |
| ,, | ,, | ए मेव | एवमेव |
| ५७ | ५ | स्थलभेदे | स्थलमार्गभेदे |
| ५८ | २ | तन्नयायेन | तन्न्यायेन |
| ६३ | ३ | च ा ताथ्र्यं | चारिताथ्र्यं |
| ,, | ७ | स्नीयते | स्रीयते |
| ,, | ८ | कल्प | कल्य |
| ६६ | १ | प्रतिबाधनै | प्रतिबाधेनै |
| ,, | १७ | सामान्यत | सामान्यतो |

॥ इति ॥